हवनमा चाहिने सामग्री

१- पञ्चोपचार- फूल, चन्दन, धूप, दीप र नैवेद्य ।
२- पञ्चरत्न- सुन, चाँदी, मूगा, पुँवालो र मोती ।
३- पञ्चपल्लव- आँप, पीपल, वर पाकरी र डुम्री ।
४- पञ्चामृत-गाईको दूध, दही, घिउ, मह र चीनी ।
५- पञ्चगव्य-गाईको दूध, दही, घिउ, गहुँत र गोबर । (यसको प्रमाणमा-गाईको दूध तीन भाग, घिउ एक भाग, गहुँत एक भाग र गोबर आधा भाग)
६- षोडशोपचार- आवाहन १, आसन २, पाद्य ३, अर्घ्य ४, आचमनीय ५, स्नान ६, वस्त्र ७, जनै ८, चन्दन ९, फूल १०, धूप ११, दीप १२, नैवेद्य १३, दक्षिणा १४, प्रदक्षिणा १५, नमस्कार १६।

हवनमा चाहिने सामग्री

१- पञ्चोपचार- फूल, चन्दन, धूप, दीप र नैवेद्य ।

२- पञ्चरत्न- सुन, चाँदी, मूगा, पुँवालो र मोती ।

३- पञ्चपल्लव- आँप, पीपल, वर पाकरी र डुम्री ।

४- पञ्चामृत-गाईको दूध, दही, घिउ, मह र चीनी ।

५- पञ्चगव्य-गाईको दूध, दही, घिउ, गहुँत र गोबर ।
(यसको प्रमाणमा-गाईको दूध तीन भाग, घिउ एक भाग, गहुँत एक भाग र गोबर आधा भाग)

६- षोडशोपचार- आवाहन १, आसन २, पाद्य ३, अर्घ्य ४, आचमनीय ५, स्नान ६, वस्त्र ७, जनै ८, चन्दन ९, फूल १०, धूप ११, दीप १२, नैवेद्य १३, दक्षिणा १४, प्रदक्षिणा १५, नमस्कार १६।

७- सर्वौषधी- कूट, बेसार (हल्दी), जटामसी, मुरा, चुत्रो, शिलाजीत, श्रीखण्ड, बोझो, चाँपो, मोथे ।

८- पूजा-सामग्री- जौ, तिल, कुश, जल, चन्दन, अबीर, सिन्दूर, फूल, कुमकुम, धूप, दीप, नैवेद्य, वस्त्र, जनै, सुपारी, पंचमेवा, पञ्चामृत, पञ्चपल्लव, कपूर, दूबो र यथासम्भव अन्यान्य वस्तुहरू चाहिन्छ ।

९- हवन-सामग्री- रेखीको पीठो, समिधा, कर्मपात्र, कुश, चन्दन, अबीर, जौ पाँच टपरीमा, चामल छः टपरीमा, तिल एक किलो, तामाको वा माटोको कलश पाँच, पञ्चरत्न, पञ्चपल्लव, पञ्चामृत, सप्तमृत्तिका, सर्वौषधी, रक्षाबन्धन, पुण्याहवाचन, ब्राह्मणवरण, आज्यस्थाली, चरुस्थाली, जनै पाँच जोर, सिंगो सुपारी सात, वस्त्र वेदीको लागि माटो ईंट, गोदान, पूर्णपात्र, ब्राह्मण-भोजन, दक्षिणा।

१०-तामाको थाली, कुश-पवित्र, जौ, तिल, चन्दन, अक्षता र फूल।
११-गणेशपूजामा–पंचोपचार वा षोडशोपचारको सामग्री चाहिन्छ ।
१२-अर्घमा–दूध, दही, जौ, तिल, अक्षता, जल, दूबो र फल–यी आठ वस्तु चाहिन्छ ।
१३-सप्तमृत्तिका–घोडा बाँध्ने तवेलाको, गाई राख्ने गोठको, हात्तीसारको, राजद्वार र नदीका दोभानको सर्पको प्वालको तथा तलाउको माटो सप्तमृत्तिका कहिन्छ ।
१४-पूर्णाहुतिमा–एवं यथोचितं शक्त्या हुत्वा पूंर्णाहुतिं चरेत् ।

घृतेनापूर्य स्रुग्गर्तमूर्ध्ववक्त्रश्रुतिस्रुवम् ।।
निधायाधोमुखं न्यस्तं स्रुवाग्रः कुसुमाक्षतम् ।
पश्चाद्वामं पुरोदक्षकराभ्यां शङ्खमुद्रया ।।

गृहीत्वा श्रुक्स्रुवौ मन्त्रैः स्रुवाग्रन्यस्तलोचनः ।
ऋजुकायः प्रसन्नात्मा समपादः समुत्थितः ॥
स्थिरधीर्जुहुयादग्नौ यवप्रतिमधारया ।
पूर्णाहुतिरियं प्रोक्ता सर्वकर्मप्रपूरणी ॥-संग्रहे

१५-नवग्रह समिधा–खयर, पलाश, आँक, डुम्री, अपामार्ग, शमी, पीपल दूवो र कुश ।

१६-घृतछाया–घिउ, कुश, दूबो; काँसको पात्र (कचौरा), सुनको प्रतिमा र द्रव्य ।

१७- ब्राह्मणवरण– वस्त्र, चन्दन, अक्षता, फूल, सुपारी र द्रव्य ।

१८- पुण्याहवाचन–फूल, अक्षता, सुपारी र द्रव्य ।

----- * -----

कर्मपात्रम् —

आसने उपविश्य आचम्य स्थापनम्- ॐ यद्देवादेवहेडनन्देवासश्च-कृमावयम् । अग्निर्म्मातस्मादेनसोव्विश्वान्मुञ्चत्त्वᳪहसः।। ॐयदिदिवायदिनक्त मेनाᳪसिचकृमाव्वयम् । व्वायुर्मातस्मादेनसो-विश्वान्मुञ्चत्त्वᳪहसः ।। ॐयदिजाग्रद्यदिस्वप्नऽएनाᳪसिचकृमावयम्। सूर्य्योमातस्मादेनसो विश्वान्मुञ्चत्त्वᳪहसः।

तत्र पवित्रकुशान् क्षिपेत्-ॐ पवित्रेस्थोवैष्णव्योसवितुर्वः प्रसवऽउत्पुना-म्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ।। देवीरापोऽअग्रेगुवोऽअग्रेपुवोग्रऽ-इममद्ययज्ञन्नयताग्ग्रेयज्ञपतिᳪ सुधातुं यज्ञपतिन्देवयुवम् ।।

जलम्-ॐशन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंयोरभिस्रवन्तुनः।।

चन्दनम्- ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टांकरीषिणीम्।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

यवान्– ॐ यवोसियवयास्मद्द्वेषोयवयारातीः दिवेत्वान्तरिक्षायत्वापृथिव्यै
त्वाशुन्धन्ताँल्लोकाः पितृषदनः पितृषदनमसि ।।

तिलान्–ॐ तिलोसि सोमदैवत्यो गोवसो देवनिर्मितः ।
प्रत्नमद्भिःपृक्तःस्वधयापितृँल्लोकान् प्रीणाहिनः स्वाहा ।।

अक्षतान्–ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ।
अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्वीन्द्रतेहरी ।।

पुष्पाणि– ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ
व्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ।।

सर्वतः त्रिभिः कुशैः सेचनम्–

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

ॐ पुण्डरीकाक्षः पुनातु ।

।। इति कर्मपात्रविधिः ।।

अग्निस्थापनविधिः

पञ्चभूः संस्कारः

भूमिशोधनम्–ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्य-भुवनस्यधर्त्री । पृथिवींयच्छपृथिवीन्दृ ꣳ हपृथिवीम्माहि ꣳ सीः ॥१॥

यस मन्त्रले भूमिशोधन गर्नू । सत्ताइस अंगुलको घेरा र चार अंगुल अग्लो वेदी बनाउने प्रमाण पाइन्छ ।

मृत्तिकास्थापनम्-ॐ अश्माचमेमृत्तिकाचमेगिरयश्चमेपर्वताश्चमे सिकताश्चमेवनस्पतयश्चमेहिरण्यञ्चमेयश्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमे त्रपु चमे यज्ञेनकल्पन्ताम् ॥२॥

यस मन्त्रले मृत्तिका (माटो) स्थापन गर्नू ।

त्रीन् कुशान् परिगृह्य -ॐ एषवः स्तोमोमरुतऽइयङ्गीर्म्मान्दार्यस्य-मान्यस्यकारोः । एषायासीष्टतन्न्वेवयांविद्यामेषंवृजनञ्जीरदानुम्।।३।।

यस मन्त्रले तीन टुक्रा कुश लिनू ।

कुशैः पांसूनपसार्य ऐशान्यां क्षिपेत्-ॐ यद्देवादेवहेडनन्देवासश्चकृमा-वयम् । अग्निर्म्मातस्मादेनसोविश्वान्मुञ्चत्वꣳ हसः ।।४।।

यस मन्त्रले कसिंगर बढारेर उत्तरतिर फाल्नू ।

गोमयोपलेपनन्- ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽ-अश्वेषु रीरिषः । मानोवीरान्नुद्रभामिनोवधीर्हविष्मन्तः सदमित्त्वाहवामहे।।५।।

यस मन्त्रले गाईको गोबरले लिप्नु ।

स्फ्य, स्रुवं, कुशमूलं गृहीत्वा-ॐ त्वामिद्धिहवामहेसातौवाजस्यकारवः।। त्वांवृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठासर्वतः ।।६।।

यस मन्त्रले स्फ्य सुरो र कुश हातमा लिनू ।

तिस्रः रेखाकरणम्- ॐ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्त्येनसत्यं यज्ञेनयज्ञोयजुर्भिर्यजᳲ षिसामभिः सामान्यृंग्भिऋचः- पुरोनुवाक्याभिः पुरोनुवाक्यायाज्याभिर्याज्यावषट्कारैर्वषट्काराऽआहुति भिराहुतयोमेकामान्त्समर्द्धयन्तु भूःस्वाहा ।।७।। ॐ दक्षिणामारोहत्रिष्टुप्त्वा वतुबृहत्सामपञ्चदशस्तोमोग्रीष्मऽऋतुः क्षत्रन्द्रविणं प्रतीचीमारोह ।।८।। ॐ प्रतीचीमारोहजगतीत्त्वास्तु वैरूपᳲसामसप्तदशस्तोमोवर्षा ऋतुर्विड्द्रविमुदीचीमारोह ।।९।। उदीचीमारोहानुष्टुप्त्वावतुवै राजᳲ सामैकविᳲशस्तोमः शरदृतुः फलन्द्रविणमूर्ध्वा मारोह ।।१०।।

यी तीन मन्त्रले पूर्व-पश्चिम पारेर वेदीमा तीन रेखा तान्नू ।

अनामिकाङ्गुष्ठाभ्यां यथालिखितपांसूनुद्धृत्य क्रमशो वामहस्ते निधाय-

ॐ सदसस्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्यम् ।। सनिम्मेधामयासिषꣳ स्वाहा ।।११।।

यस मन्त्रले साहिंली र बूढी औंलाले वेदीको अलिकति माटो बायाँ हातमा लिनू ।

उत्तरस्यां क्षिपेत् –ॐ व्रतङ्कृणुतव्रतङ्कृणुताग्निर्ब्रह्माग्निर्यज्ञोवनसपतिर्यज्ञियः ।। दैवींधियमनामहेसमृडीकामभिष्टयेवर्च्चोधांयज्ञावहसꣳ सुतीर्थानोऽसद्वशे । येदेवामनोजातामनोयुजोदक्षक्रतवस्तेनोवन्तुतेनः पान्तुतेभ्यः स्वाहा ।।१२।।

यस मन्त्रले हातमा लिएको माटो उत्तरतिर फालिदिनू ।

न्युब्जपाणिना जलेनाभ्युक्ष्य-ॐशन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शंयोरभिस्रवन्तुनः ।।१३।।

यस मन्त्रले घोप्टो हात पारी जलले वेदीमा सेचन गर्नू ।

स्वस्तिवाचनम्-ॐ स्वस्तिनोमिमीतामश्विनाभगः स्वस्तिदेव्योदिति-
रथर्वणः ।। स्वस्ति पूषाऽअसुरोदधातुनः स्वस्तिद्यावापृथिवीसुचेतुना।१।
ॐ स्वस्तयेवायुमुपब्रुवामहे ।। सोमंस्वस्तिभुवनस्ययस्पतिः।
बृहस्पतिःसर्वगणꣳस्वस्तये स्वस्तयऽआदित्यासोभवन्तुनः ।।२।। ॐ
विश्वेदेवानोऽअद्यास्वस्तयेवैश्वानरोवसुरग्निः स्वस्तये ।। देवाऽअभवन्त्व-
भवः स्वस्तये स्वस्तिनोरुद्रः पात्वꣳहसः ।।३।। ॐ स्वस्तिमित्रावरुणा-
स्वस्तिपत्थ्येनरेवती ।। स्वस्तिनऽइन्द्रश्चाग्निश्चस्वस्तिनोऽअदितेकृधि
।।४।। ॐ स्वस्तिपन्थामनुचरेमसूर्याचन्द्रमसाविव ।। पुनर्ददताघ्नता-
जानतासङ्गमेमहि।।५।। ॐ स्वस्तयनन्ताक्ष्यमरिष्टनेमिमहद्भूतंवाय-
सन्देवतानाम् ।। असुरघ्नमिन्द्रसखंसमत्सुबृहद्यशोनावमिवारुहेम ।।६।।
ॐ अꣳहोमुचमा-ङ्‌्र सञ्जयन्तः स्वस्त्यात्रेयंमनसाचताक्ष्यम् ।।
प्रयतपाणिः शरणं प्रपद्ये स्वस्तिसंवादेष्वभयन्नोऽअस्तु ।।७।।

ॐ आशुः शिशानोबृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनाम्॥
सङ्क्रन्दोनिमिषऽएकवीरः । शतꣳ सेनाऽअजयत्साकमिन्द्रः ॥१॥
सङ्क्रन्दने नानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना ॥
तदिन्द्रेणजयततत्सहध्ध्वंयुधोनरऽइषुहस्तेनवृष्णा ॥२॥ सऽइषुहस्तैः
सनिषङ्गिभिर्वशीसꣳसष्टा सयुधऽइन्द्रोगणेन ॥सꣳसृष्टजित्सोमपाबाहु-
सर्द्ध्युग्रधन्वा प्रतिहिताभि रस्ता ॥३॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ
॥२॥ ऽअपबाधमानः ॥ प्रभ ञ्जन्त्सेनाः प्रमृणोयुधाजयन्नस्माकमे
ध्यवितारथानाम् ॥४॥ बलविज्ञा-यस्थ विरः प्रवीरः सहस्वान्वाजी
सहमानऽउग्रः॥ अभिवीरोऽअभिसत्त्वा-सहोजा जैत्रमिन्द्ररथमातिष्ठ-
गोवित् ॥५॥ गोत्रभिदङ्गोविदंवज्रबाहुञ्ज-यन्तमज्मप्रमृणन्तमोजसा॥
इमꣳसंजाताऽअनुवीरयद्ध्वमिद्रꣳसखायोऽअनुसꣳरभद्ध्वम् ॥६॥
अभिगोत्राणिसहसागाहमानोदयोवीरः शतमन्युरिन्द्रः दुश्च्यवनः

पृतनाषाडयुद्ध्योस्माकꣳसेनाऽअवतुप्रयुत्सु ॥७॥ इन्द्रऽआसा न्नेताबृहस्पतिर्दक्षिणायज्ञः पुरऽएतुसोमः ॥ देवसेनानामभिभञ्जतीनाञ्जय न्तीनाम्मरुतोयन्त्वग्रम् ॥८॥ इन्द्रस्यवृष्णोवरुणस्यराज्ञऽआदित्या-नाम्मरुताꣳशर्द्धऽउग्रम् ॥ महामनसाम्भुवनच्यवानाङ्घोषोदेवानामु-दस्थात् ॥९॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳ सि । उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानाञ्जयताँयन्तु-घोषाः ॥१०॥ अस्माकमिन्द्रः समृतेषुध्वजेस्वस्मकंयाऽइषवस्ताजयन्तु॥ अस्माकं-वीराऽउत्तरे भवन्त्वस्माँ ॥२॥ ऽउदेवाऽअवताहवेषु ॥११॥ अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्वेपरेहि ॥ अभिप्रेहिनिर्दह-हृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम् ॥१२॥ अब सृष्टापरापतशर-व्येब्रह्मसꣳशिते॥ गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः॥१३॥ प्रेताजयतानरऽइन्द्रोवः शर्मयच्छतु ॥ उग्रावः सन्तुबाहवो नाधृ-

ष्यायथासथ ।।१४।। असौषासेनामरुतः परेषामभ्यैतिनऽओजसा स्प्पर्द्धमाना ।। ताङ्गूहततसमापव्रतेनयथामीऽअन्योऽअन्यन्नजानन् ।।१५।। यत्रबाणाः सम्पतन्तिकुमाराविशिखाऽइव ।। तन्नऽइन्द्रो-बृहस्पतिरिदितिः शर्म्मयच्छतुविश्वाहाशर्म्मयच्छतु ।।१६।। मर्म्माणिते-वर्म्मणाच्छादयामिसोम-स्त्वाराजामृतेनानुवस्ताम् ।। उरोर्वरीयोवरुणस्ते कृणोतुजयन्तन्त्वानुदेवा मदन्तु ।।१७।।

—पठन् पिष्टे वेदीं भूषयित्वा अष्टदिक्षु वेद्याः पूजनम्-

यी जम्मा चोबीस मन्त्र पढदै जौको पीठोले वेदीमा रेखी हाल्नू र वेदीलाई फूल-पात आदिले सिंगार्नू । अनि चन्दन, अक्षता, फूलले आठ दिशाहरूको पूजा गर्नू ।

पूर्वे-ॐ पृथिव्याःसधस्थादग्निम्पुरीष्यमङ्गिरस्वदाभराग्निम्पुरीष्य-मङ्गिर स्वदच्छेमोऽग्निम्पुरीष्यमङ्गिरस्वद्भरिष्यामः ।।

यस मन्त्रले पूर्वतिर पूजा गर्नू ।

दक्षिणे-ॐ अग्निश्चपृथिवीचसन्नतेतेमेसन्नमतामदोवायुश्चान्तरिक्षञ्च-
सन्न तेतेमेसन्नमतामदऽआदित्यश्चद्यौश्चसन्नतेतेमेसन्नमतामदऽआपश्च-
वरुणश्चसन्नतेतेमेसन्नमतामद ꣳ सप्तसः सदोऽअष्टमीभूतसाधनी
सकामाँ।।२।। ऽअद्ध्वनस्कुरुसंज्ञानमस्तुमेमुना ।।

यस मन्त्रले दक्षिण दिशाको पूजा गर्नू ।

पश्चिमे-ॐ वायायेतेसहस्त्रिणोरथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये।।

यस मन्त्रले पश्चिम दिशाको पूजा गर्नू ।

उत्तरे-ॐ सोमोधेनुः सोमोऽअर्वन्तमाशुꣳसोमोवीरङ्कर्मण्यन्ददाति।।
सादन्यंविदत्थ्यः सभेयंपितृश्रवणंयोददाशदस्मै ।।

यस मन्त्रले उत्तर दिशाको पूजा गर्नू ।

आग्नेये -ॐ अग्निन्दूतं पुरोदधेहव्यवाहमुपब्रुवे । देवाँर ऽआसादयादिह।

यस मन्त्रले आग्नेयतिर पूजा गर्नू ।

नैऋत्ये-ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयावृता।।
यस मन्त्रले नैऋत्य दिशाको पूजा गर्नू ।
वायब्ये-ॐवायुरनिलममृतमथेदम्भस्मान्तँ शरीरम् ।
क्रतोस्मरक्लीबेस्मरकृतँस्मर ।।
यस मन्त्रले वायव्य दिशाको पूजा गर्नू ।
ईशाने-ॐ ईशावास्यमिदँ सर्वंयत्किञ्चजगत्यांजगत् ।
तेनत्यक्तेनभुञ्जीथामागृधः कस्यस्विद्धनम् ।।
यस मन्त्रले ईशान कोणको पूजा गर्नू ।
मध्ये- ॐ सूर्यरश्मिर्हरिकेशः पुरस्तात् सविताज्योति-रुदयाँ२।।ऽअजस्रम् ।।
तस्यपूषाप्रसवेयातिविद्वान्त्संपश्यन्विश्वाभुवनानिगोपाः ।।
यस मन्त्रले माझमा पूजा गर्नू ।

यस मन्त्रल माझमा पूजा गनू ।

ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्तुवयँ ᳬ स्यामपतयोरयीणाम् ।।
ॐ सदसस्पतिमद्भूतम्प्रियमिन्द्रस्यकाम्यम् ।
सनिम्मेधामयासिषः स्वाहा ।।
समिच्छोधनम्-ॐ कस्त्वासत्योमदानामँ ᳬ हिष्ठोमत्सदन्धसः ।
दृढाचिदारुजेवसु ।।

यस मन्त्रले समिधा शोधन गर्नू ।

वेद्यां समित्स्थापनम्-ॐ त्वामिद्धिहवामहेसातौवाजस्यकारवः।।
त्वांबृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठासर्वतः ।।

वेदीमा समिधा राख्नू । यसका दुइ भेद छन्- तीनपल्ट पाँच र तीनपल्ट तीन । अनि सबभन्दा माथि योनिको आकार पारेर तीन । जम्मा सत्ताइस भयो । अर्को

विधानमा–तीन पाँच, तीनपल्ट तीन र माथिबाट फेरि पाँच समिधा राख्नू । जम्मा उनन्तीस भयो ।

कांस्यपात्रे निहितं तेनैव पिहितम् अग्निम् स्थण्डिलादाग्नेयभागे निधाय क्रव्यादांशं 'ॐ क्रव्यादाय नमः' इति नैऋत्यदिशि क्षिपेत् । स्थण्डिले पश्चादानीय–

काँसको पात्रमा काँसकै पात्रले ढाकी अग्नि ल्याएर आग्नेयतिर राखी 'ॐ क्रव्यादाय नमः' भनी अलिकति फालिदिएर आफ्नू सामू राख्नू ।

अग्निशोधनम्–ॐ अग्नावग्निश्चरतिप्रविष्टऽऋषीणाम्पुत्रोऽअभि-शस्तिपावा सनः स्योनः सुयजायजेहदेवेभ्योहव्यः सदमप्रयुच्छन्त्स्वाहा।।

यस मन्त्रले अग्निशोधन गर्नू ।

अग्निं गृहीत्वा–ॐ मयिगृह्णाम्यग्नेऽअग्निं रायस्पोषायसुप्रजास्त्वा-यसुवीर्याय ।। मामुदेवताः सचन्ताम् ।।

यस मन्त्रले अग्नि ग्रहण गर्नू ।

यस मन्त्रले अग्नि ग्रहण गर्नू ।

अग्नि संस्कारः

अग्नेः गर्भाधानम्-ॐ गर्भोऽस्योषधीनांगर्भोवनस्पतीनाम् ॥ गर्भोविश्वस्यभूतस्याग्नेगर्भोऽपामसि ॥- अग्नेःगर्भाधानं करोमि॥

यस मन्त्रले अग्निको गर्भाधान गर्नू ।

पुंसवनम्-ॐ विवस्वन्नादित्येषतेसोमपीथस्तस्मिन्मत्स्व ॥ श्रदस्मैनरोवचसेदधातनयदाशीर्दादम्पतीवाममश्नुतः ॥ पुमान्पुत्रोजायतेविन्दतेवस्वधाविश्वाहारपऽएधतेगृहे ॥ -अग्नेः पुंसवनं करोमि ॥

यस मन्त्रले अग्निको पुंसवन कर्म गर्नू ।

सीमन्तोन्नयनम्-ॐ अजाजनोहिपवमानसूर्यंविधारेशक्मनापयः।। गोजीरयारँ हमाणः पुरन्ध्या ।।-अग्नेः सीमन्तोन्नयनं करोमि ।।

यस मन्त्रले अग्निको सीमन्तोन्नयन गर्नू ।

जातकर्म- ॐ एजतुदशमास्योगर्भोजरायुणासह ।। यथायंवायुरेजति-यथासमुद्रऽएजति ।। एवायंदशमास्योऽअस्रज्जरायुणासह ।। -अग्नेः जातकर्म करोमि ।।

यस मन्त्रले अग्निको जातकर्म गर्नू ।

नामकरणम्-ॐ यदापिपेषमातरम्पुत्रः प्रमुदितोधयन् ।। एतत्तदग्नेऽअनृणोभवाम्यहतौपितरौमया ।। सम्पृचस्थसम्माभद्रेणपृङ्क्त।। विपृचस्त्थविमापाप्मनापृङ्क्त ।।- अग्नेः नामकरणं करोमि ।

यस मन्त्रले अग्निको नामकरण गर्नू ।

यस मन्त्रले अग्निको नामकरण गर्नू ।

निष्क्रमणम्-ॐ पूषापञ्चाक्षरेणपञ्चदिशऽउदजयत्ताऽउञ्जेषँ सविता-षडक्षरेणषड्तूनुदजयत्तानुञ्जेषम्मरुतःसप्ताक्षरेणसप्तग्राम्यान्पशूनु-दजयँस्तानुञ्जेषम्बृहस्पतिरष्टा क्षरेणगायत्रीमुदजयत्तामुज्जेषम्मि-त्रोनवाक्षरेण ।। - अग्नेः निष्क्रमणं करोमि ।।

यस मन्त्रले अग्निको निष्क्रमण गर्नू ।

अन्नप्राशनम्- अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ।। प्रप्रदातारन्तारि-षऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ।। -अग्नेः अन्नप्राशनं करोमि ।

यस मन्त्रले अग्निको अन्नप्राशन गर्नू ।

चूडाकर्म-ॐ अग्नऽआयाहिवीतयेगृणानोहव्यदातये । निहोतायस्यव र्हिषि ।।- अग्नेः चूडाकरणं करोमि ।।

यस मन्त्रले अग्निको चूडाकर्म गर्नू ।

कर्णवेधः –ॐ भद्रंकर्णेभिः श्रृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः।।
स्थिरैरङ्गैस्तुष्टुवाः सस्तनूभिर्व्यशेमहिदेवहितंयदायुः ।।
–अग्नेः कर्णवेधं करोमि ।।

यस मन्त्रले अग्निको कर्णवेध (कान छेड्ने) गर्नू ।

उपनयनम् –ॐ अग्निरेकाक्षरेणप्राणमुदजयत्तामुज्जेषमश्विनौद्वयक्षरेण द्विपदोमनुष्यानुदजयत्तानुज्जेषंविष्णुस्त्र्यक्षरेणत्रींल्लोकानुदजयत्तानुज्जेषः सोमश्चतुरक्षरेणचतुष्पदः शशूनुदजयत्तानुज्जेषंपूषापञ्चाक्षरेण ।।
– अग्नेः उपनयनं करोमि ।।

यस मन्त्रले अग्निको उपनयन (व्रतवन्ध) गर्नू ।

गायत्रीश्रवणम्–ॐ भूर्भुवः स्वः वैश्वानरायविद्महेसप्तजिह्वायधीमहि ।।

तन्नोअग्निः प्रचोदयात् ।। -गायत्रीं श्रावयामि ।

यस मन्त्रले गायत्री सुनाउनु ।

समावर्तनम्-ॐ व्रतङ्कृणुतव्रतंकृणुताग्निर्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञियः । दैवीन्धियम्मनामहेसुमृडीकामभिष्टयेवर्चोधांयज्ञवाहसँ सुतीर्थानोऽअसद्वशे ।। येदेवामनोजातामनोयुजोदक्षक्रतवस्तेनोवन्तुतेनः पान्तु तेभ्यः स्वाहा । - अग्नेः समावर्तनं करोमि ।

यस मन्त्रले अग्निको समावर्तन कर्म गर्नू ।

गोदानकर्म-ॐ गावऽउपावतावतमहीयज्ञस्यरप्सुदा ।। उभाकर्णाहिरण्यया ।

यस मंत्रले अग्निको गोदान कर्म गर्नू ।

विवाहः- ॐ भगऽएवभगवाँ२ ।।ऽअस्तुदेवास्तेनवयंभगवन्तःस्याम।।

तन्त्वाभगसर्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह ।।–अग्नेः विवाहं करोमि ।।

यस मन्त्रले अग्निको विवाह कर्म गर्नू ।

कांस्यपात्रस्थमग्निं गृहीत्वा–ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ।। अपाꣳरेताꣳसिजिन्वति ।।

यस मन्त्रले काँसको पात्रमा भएको अग्नि लिनू ।

कुण्डे (वेद्यां) प्रवेशयेत्–ॐ ऋतावानंवैश्वानरमृतस्यज्योतिषस्पतिम्।। अजस्रङ्घर्ममीमहे ।। उपयामगृहीतोसिवैश्वानरायत्त्वैषतेयोनिर्वैश्वानरायत्त्वा ।। ॐ वैश्वानरस्यसुमतौस्यामराजाहिकम्भुवनानामभिश्रीः ।। इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्येण ।। उपयामगृहीतोसिवैश्वानरायत्वैषतेयोनिर्वैश्वानरायत्त्वा ।। ॐ वैश्वानरोनऽऊतयऽआप्रयातु-

परावतः ।। अग्निरुक्थेनवाहसा।। उपयामगृहीतोसिवैश्वानरायत्त्वैष-तेयोर्वैश्वानरायत्त्वा ।।

यी वैश्वानरका तीन मन्त्र पढेर वेदीमा अग्निको प्रवेश गराउनू ।

स्थापनम्—ॐ अग्निर्मूर्द्धादिवःककुत्पतिः पृथिव्याऽअयम् ।। अपाᳬरेता ᳬ सिजिन्वति ।।

यस मन्त्रलें स्थापित गर्नू ।।

प्रज्वलनम्- स्थिरोभववीड्वङ्गऽआशुर्भ्भववाज्यर्वन् ।। पृथुर्भ्भव-सुखदस्त्वमग्नेः पुरीषवाहणः ।।

यस मन्त्रले आगो बाल्नू ।

प्रार्थना- ॐ आवाहये त्वां पुरुषं महान्तं गुरासुरैर्वन्दितपादपद्मम् ।
ब्रह्मादयो यस्य मुखे वसन्ति प्रविश कुण्डे सुरलोकनाथ ।।

यस मन्त्रले अग्निको प्रार्थना गर्नू ।

अग्नेर्दक्षिणतः षड्भिः कुशैः ब्रह्मासनम्–ॐ हिरण्यगर्भः समवर्तताग्रेभूतस्य जातः पतिरेकऽआसीत् ।। सदाधारपृथिवींद्यामुतेमाङ्कस्मैदेवायहविषाविधेम ।।

यस मन्त्रले अग्निको दक्षिणतिर ब्रह्माको आसन दिनू ।

पञ्चाशत् कुशैः ब्रह्मपवित्रनिर्माणम्–ॐ आब्रह्मन् ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनः पर्जन्योवर्षतुफलवत्योनऽओषधयः पच्यन्तांयोगक्षेमोनः कल्पताम् ।।

अग्नि प्रदक्षिणां कारयित्वाग्नेर्दक्षिणतो ब्रह्माणमुत्तराभिमुखं संस्थापयेत्- अस्मिन् कर्मणि त्वं मे ब्रह्मा भव ।

पचास कुशको ब्रह्मा बनाएर अग्नि-प्रदक्षिणा गरी अग्निको दक्षिणतिर उत्तर फर्काएर 'अस्मिन् कर्मणि त्वं मे ब्रह्मा भव' भनी स्थापित गर्नू ।

होतुरासनम्- ॐ यस्यकुर्मोगृहेहविस्तमग्नेवर्द्धयात्त्वम् ॥
तस्मैदेवाऽअधिब्रुवन्नयञ्चब्रह्मणस्पतिः ॥

यस मन्त्रले होताको आसन दिनू ।

अग्नेर्दक्षिणतो ब्रह्मान्तिके यजमानासनम् -
ॐ अग्नेप्रेहिप्प्रथमोदेवयताञ्चक्षुर्देवानामुतमर्त्यानाम् ॥
इयक्षमाणाभृगुभिः सजोषाः स्वर्यन्तुयजमानाः स्वस्ति ॥

यस मन्त्रले अग्निको दक्षिणतिर यजमानको आसन दिनू ।

अग्नेरुत्तरतः प्रागग्रं कुशद्वयं प्रणीताग्न्योर्मध्ये प्रोक्षण्यासनम्-
ॐ परीत्यभूतानिपरीत्यलोकान्परीत्यसर्वाः प्रदिशोदिशश्च ॥
उपस्थायप्प्रथमजामृतस्यात्मनात्क्मनामभिसंविवेश ॥

यस मन्त्रले दुइ कुशको प्रणीतालाई आसन राख्नू–प्रणीता र अग्निको माझमा प्रोक्षणीको आसन दिनु ।

द्वादशाङ्गुलदीर्घं चतुरंगुलविस्तारं चतुरंगुलखातं प्रणीतापात्रं वामहस्तेनादाय सव्यहस्तकरणम्- ॐ इन्द्रऽआसान्नेताबृहस्प-तिर्दक्षिणायज्ञः पुरऽएतु सोमः ॥ देवसेनानामभिभञ्जतीनाञ्जयन्ती-नांमरुतोयन्त्वग्रम् ॥

चार अंगुल लामो, चार अंगुल गहिरो बाह्र अंगुल विस्तारको प्रणीता पात्र बायाँ हातमा लिएर दाहिने हातमा राख्नू ।

दक्षिणहस्तेनोदकं सम्पूर्य वायव्यासने स्थापयित्वा कुशैराच्छाद्य

ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमद्ध्यमꣳश्रथाय ॥
अथाव्वयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥

अब दाहिने हातले जल हाली वायव्यासनमा राखि कुशले ढाकेर ब्रह्माको मुखतिर हेर्दै उत्तरतिर मन्त्र पढेर राखिदिनू ।

बर्हिर्मुष्टिमादाय चतुर्धा विभज्यैकभागेन कुशैराग्नेयादीशानान्तमुत्तराग्रम् ब्रह्मणोऽग्निपर्यन्तं पूर्वाग्रम्, नैर्ऋत्याद्वायव्यान्तमुत्तराग्रम्, अग्नितः प्रणीतापर्यन्तं पूर्वाग्रं परिस्तरणम्–

ॐ येतेशतंवरुणंयेसहस्त्रंयज्ञियाः पाशावितितामहान्तः ॥
तेभिर्नोऽअद्यसवितोतद्विष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा॥

यस मन्त्रले बर्हि हातमा लिएर चार भाग पारी एक भाग आग्नेयदेखि ईशानसम्म उत्तराग्र पारेर राख्नू । ब्रह्मादेखि अग्निसम्म पूर्वाग्र पार्नू, नैर्ऋत्यदेखि वायव्यसम्म उत्तराग्र पार्नू र अग्निदेखि प्रणीतासम्म पूर्वाग्र पारेर विछाउनु ।

पात्रासादनम्- ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ।। अहेडमानोवरुणेहवोद्ध्युरुशꣳस समानऽआयुःप्रमोषीः ।।

यो मन्त्रले पात्रासादन गर्नू ।

पवित्रच्छेदनार्थं कुशपत्रत्रयम् -ॐ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम्।। उर्व्वारुकमिवबन्धनान्मृत्योमुक्षीयमामृतात् ।। त्र्यम्बकंयजामहेसुगन्धिम्पतिवेदनम् ।। उर्वारुकमिवबन्धनादितोमुक्षीयमामुतः ।।

अब यस मन्त्रले पवित्रछेदनका लागि तीन टुक्रा कुश लिनू ।

साऽग्रेनन्तर्गर्भे कुशपत्रे द्वे पवित्रकरणार्थम् -ॐ पवित्रेस्थोवैष्णव्यौ सवितुर्वःप्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः ।। देवीरापोऽअग्रेगु वोऽअग्रे पुवोग्रऽइममद्ययज्ञन्नयताग्रेयज्ञपतिः सुधातुंयज्ञपतिन्देवयुवम्।।

त्यसैबाट टुप्पा भएको दुइ कुश पवित्र बनाउन यस मन्त्रले लिनू ।

द्वादशाङ्गुलदीर्घं करतलसम्मितखातं पद्मपत्राकृतिः कमलमुकुलाकृतिर्वा प्रोक्षणीपात्रं न्युब्जं कुर्यात् -

ॐ इमम्मेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥

यस मन्त्रले बाह्र अंगुल लामो कमलको आकृति भएको प्रोक्षणी पात्र घोप्टो पार्नु ।

तैजसी वा मृण्मयी द्वादशाङ्गुलविस्तृता प्रादेशोच्चाज्यस्थाली न्युब्जा स्थापयेत् ।[१]

ॐ घृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुधेसुपेशसा ॥
द्यावापृथिवीवरुणस्यधर्मणाविष्कभितेऽअजरेभूरिरेतसा ॥

१- स्थालीपाकपक्षे चरुपाकपर्याप्तं दुग्धादिद्रव्यसत्त्वे अमुकाय जुष्टाङ्गृह्णामि । उक्त्वा चतुर्वारं तण्डुलमुष्टिं प्रक्षिपेत्, चर्वन्तरसत्वेऽपि निर्वपेत् ।

यस मन्त्रले माटो वा धातुको बाह्र अंगुल विस्तृत आज्यस्थाली (घिउको पात्र) घोप्टो पार्नू ।

चरुस्थाली तादृशी एव न्युब्जा-ॐ अन्नपतेन्नस्यनोदेह्यनमीव-स्यशुष्मिणः प्रप्रदातारन्तारिषऽऊर्ज्ज-न्नोधेहिद्विपदेचतुष्पदे ॥

यस मन्त्रले चरुस्थाली पनि घोप्टो पार्नू ।

सम्मार्जनकुशास्त्रिप्रभृतयः -ॐ शादन्दद्भिरवकादन्तमूलैर्म्मृदंव्वस्वै-स्तेगा नन्दँ ष्ट्राभ्याँ सरस्वत्याऽअग्रजिह्वञ्जिह्वायाऽउत्सादमवक्रन्दे-नतालु व्वाजः हनुभ्यामपऽआस्येनवृषणमाण्डाभ्यामादित्याँ २॥ऽ श्मश्रुभिः पन्थानम्भ्रूभ्यांद्यावापृथिवीव्वर्तोभ्यांविद्युतङ्कनीनकाभ्या ँ शुक्लायस्वाहा कृष्णायस्वाहा पार्याणिपक्ष्माण्यवार्याऽइक्षवोवार्याणि-पक्ष्माणिवार्याऽइक्षवः ।

यस मन्त्रले सम्मार्जन गर्ने कुश भिन्नै राख्नू ।

उपयमनकुशास्त्रयोदश-ॐ उपयामगृहीतोस्यन्तर्यच्छमघवन्पाहि-सोमम्।। उरुष्यरायऽएषोयजस्व ।।

यस मन्त्रले तेह्र कुशको उपयमन बनाउनू ।

समिधस्तिस्रः पालाश्यः प्रादेशमात्राः पृथक् स्थापयेत्-ॐ समिधाग्नि-न्दुवस्यतघृतैर्ब्बोधयतातिथिम् ।। आस्मिन्हव्याजुहोतन ।।

यस मन्त्रले पलाशको तीन टुक्रा समिधा भिन्नै राख्नू ।

स्रुवः-खादिरो हस्तमात्रोऽङ्गुष्ठपर्वमात्रखातः परिणाहवर्तुलपुष्करो न्युब्जः । गव्यम्, आज्यम् ।

सुरो खयरको एक हात लामो, टुप्पामा बाटुलो भएको घोप्टाइराख्नू ।

चरुः- त्रिःप्रक्षालिता ब्रीहितण्डुलाः (तण्डुलार्धं तिलाः, तिलार्धं आज्यम् यवाः, ब्रीहिः) दक्षिणाद्रव्यम् ।।

चरुको निम्ति तीन पानी पखालेको चामल र चामलको (आधा तिल र तिलको आधा जौ वा चामल) दक्षिणा द्रव्य यी सबै ठीक्क पारिराख्नू ।

पूर्णपात्रम्- बहुभोक्तृपुरुषाहारपरिमितं २५६ मुष्टयात्मकम् । अन्यानपि होमोपयुक्तानि द्रव्याण्यासाद्य अग्नेरुत्तरतो यथाक्रमं स्थापनीयम् ।

पूर्णपात्र बढी खाने पुरुषको आहार जति अथवा २५६ मुठी अरू पनि हवनमा चाहिने द्रव्यहरू अग्निको उत्तरतिर यथाक्रम राख्नू ।

पवित्रम्- ततः पूर्वासादितकुशपत्रे गृहीत्वाऽग्रतः प्रादेशमात्रं विहाय तयोरुपरि आसादितानि त्रीणिकुशतरुणानि तिर्यङ्निधाय पवित्रमूलेन पवित्रे प्रदक्षिणक्रमेणावेष्ट्य त्रयाणां मूलाग्राणि द्वयोर्मूलानि च दक्षिणहस्तेन पवित्रे वामहस्तेन परिगृह्य -ॐ पवित्रेस्त्थोव्वैष्णव्यौ-सवितुर्वः प्रसवऽउत्पुना म्यच्छिद्रेण पवित्रेण सूर्यस्यरश्मिभिः ॥ छित्वाद्वयोर्मूलं त्रीणिचोत्तरतः क्षिपेत ॥

यस मन्त्रले पहिले राखिएका कुशका टुक्रा लिएर टुप्पा बाहेक तीन टुक्रा तेर्सो राखेर पवित्रको मूलले प्रदक्षिणा पारी बेरेर तीन कुशको मूल भाग दाहिने हातबाट बायाँ हात लिनू अनि छिनालेर उत्तरतिर फालिदिनू । अनि शेष टुक्राको पवित्र बनाउनू ।

पवित्रे प्रणीतापात्रे निधाय– ॐ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्या-म्पूष्णोहस्ताऽभ्याम् ।। अग्नयेजुष्टङ्गृह्णाम्यग्नीषोमाऽभ्याञ्जुष्टङ् गृह्णामि।। अद्भ्यस्त्वौषधीभ्योनुत्वामातामन्यतामनुपितानुभ्रातासगर्भ्यो-नुसखासयूथ्यः ।। अग्नीषोमाभ्यांत्वाजुष्टंप्रोक्ष्यामि ।।

यस मन्त्रले प्रणीता पात्रमा चोभेर सबै वस्तुमा जल छर्किदिनू ।

प्रोक्षणीपात्रं प्रणीताया उत्तरतो निधाय, प्रणीतोदकं सपवित्रहस्तेन निक्षिप्य, तदुदकं पवित्राभ्यां प्रादेशमात्रमूर्ध्वं क्षिप्त्वा प्रोक्षण्यां निधाय प्रोक्षणीपात्रं वामहस्ते कृत्वा तदुदकं दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां त्रिरूर्ध्वं

क्षिप्त्वा प्रणीतोदकेन प्रोक्षण्युदकेन आसादितन्युब्जानि उत्तानानि कृत्वा आज्यस्थाल्यादीन्येकैकशस्त्रिः प्रोक्ष्य असञ्चरे प्रणीताग्न्योर्मध्ये प्रोक्षणीपात्रं निदध्यात् । आज्यस्थालीमग्नेः पश्चान्निधाय तत्रासादित-माज्यमात्माभिमुखं प्रक्षिप्य । चरुश्चेच्चरुस्थाल्यां प्रणीतोदकेनासिच्य तण्डुलान् प्रक्षिपेत् । तत्र चरुसत्त्वे पात्रान्तरे निक्षिपेत् ।

ॐ घृताच्यसिजुहूर्नाम्नासेदंप्रियेणधाम्नाप्रियꣳ सदऽआसीद ।। घृताच्य-स्युपभृन्नाम्नासेदंप्रियेणधाम्नाप्रियꣳ सदऽआसीद ।। प्रियेण धाम्नाप्रियꣳ सदऽआसीद ।। ध्रुवाऽअसदन्नृतस्ययोनौताविष्णोपाहि।। पाहियज्ञंपाहियज्ञपतिंपाहिमांयज्ञन्यम् ।।

प्रोक्षणी पात्र प्रणीताको उत्तरतिर राख्नू, अनि प्रणीतामा जल हालेर पवित्रले जल उफार्नू र पवित्र प्रोक्षणी पात्रमा राखी प्रोक्षणी पात्र बायाँ हातमा लिनू, अनि त्यसको जल दाहिने हातको साहिली र बूढी औंलाले तीनपल्ट मास्तिर छर्कनू । अनि घोप्टो पारेर राखिएका सबै पात्रहरू उत्तानो पारिदिनू । अनि घिउको पात्र अग्निको चारैतिर घुमाएर आफ्नू सामुन्ने राख्नू । चरु पनि चरुको पात्रमा राखेर प्रणीताको जलले सेचन गरिदिनु । चरुका सामान भिन्ना-भिन्नै भए मिसाएर राखिदिनु । यी सबै हस्तक्रियामा 'ॐ घृताच्यसि०' यो मन्त्र पढ्नुपर्दछ ।

आज्यस्थालीं युगपदग्नावारोप्य यथास्थानं स्थापयेत्-ॐ तेजोसि-शुक्रमस्यमृतमसिधामनामासि। प्रियन्देवानामनाधृष्टन्देवयजनमसि ।।

घिउको पात्र अग्निमा देखाएर वा तताएर यथास्थानमा राख्दा-'तेजोसि०' यो मन्त्र पढ्नुपर्दछ ।

चरुश्चाग्नावारोप्य स्थापयेत्-ॐ पशुभिः पशूनाप्नोतिपुरोडाशैर्हवी-ꣳष्या ॥ छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान् ॥

चरुको पात्र अग्निमा घुमाएर स्वस्थानमा राख्नू- 'ॐ पशुभिः०' यो मन्त्र पढ्नुपर्दछ।

ब्रह्माज्यचर्वोपरिज्वलदुल्मुकं भ्रामयित्वाग्नौ प्रक्षिपेत्-ॐ धृष्टिरस्यपाग्नेऽअग्निमामादंजहिनिष्क्रव्यादꣳ सेधादेवयजंवह ॥ ध्रुव-मसिपृथिवीन्दृꣳहब्रह्मवनित्त्वाक्षत्रवनिसजातवन्युपदधामिभ्रातृव्यस्यवधाय ।

यस मन्त्रले ब्रह्मा, चरु र घिउमा घुमाएर एउटा बल्दो समिधा अग्निमा होमिदिनु ।

उदकं स्पृष्ट्वा इतरथा हस्तमावर्तयेत् । दक्षकरे स्रुवग्रहणम्-ॐ स्रुचश्चमेचमसाश्चमे वायव्यानिचमेद्रोणकलशश्चमे ग्रावाणश्चमे धिषवणेचमेपूतभृच्चमऽआधवनीयश्चमे वेदिश्चमे बर्हिश्चमेवभृथश्चमे स्वगाकारश्चमेयज्ञेनकल्पन्ताम् ॥

यस मन्त्रले हातमा जल लिएर उल्टो पारी अग्निमा घुमाइदिनू र दाहिने हातमा सुरो लिनू ।

स्रुवः पूर्वाग्रमधोविलमग्नौ त्रिवारं तापनम्- ॐ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः ।। पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा ।।

यस मन्त्रले सुरो घोप्टो पारी तीन पल्ट अग्निमा तताउनू ।

वामे पाणावुत्तानविलं निधाय सम्मार्जनकुशाग्रभागेन स्रुवमूलादग्रपर्यन्तं स्रुवप्रोक्षणम्-ॐ प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽ-अरातयोनिष्टप्तꣳ रक्षोनिष्टप्ताऽ अरातयः ।। उर्वन्तरिक्षमन्वेमि।।

यस मन्त्रले बायाँ हातमा उत्तानो सुरो लिएर सम्मार्जन कुशको अग्रभागले वा टुप्पोले सुरोको मूलदेखि टुप्पासम्म प्रोक्षण गर्नु वा मुसार्नु ।

दक्षिणहस्तधृतमध्यान्तं सम्मार्जनकुशानामग्रमूलतोऽग्रैपर्यन्तं मूलैरग्रतोमूलपर्यन्तं स्रुवसम्मार्जनम्–ॐ अनिशितोसिसपत्प्नक्षिद्वाजिनींत्वावाजेद्ध्यायैसम्मार्ज्मि ।। सम्मार्जनकुशोत्तरे प्रक्षिपेत् ।

यस मन्त्रले उत्तानो हातले सम्मार्जन कुशको अग्रभागले सुरोको जरोदेखि टुप्पासम्म सम्मार्जन गर्नु ।

स्रुवप्रतपनम्– ॐ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः ।।
पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा ।।

यस मन्त्रले सुरो आगोमा तताउनू ।

प्रणीतोदकेनाभिषिञ्चेत्–ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये। शंयोरभिश्रवन्तुनः ।।

यस मन्त्रले प्रणीताको जलले सुरोमा सेचन गर्नू ।

पुनः स्रुवः प्रतपनम्- ॐ तत्त्वायामिब्ब्रह्मणावन्दमानस्तदाशास्तेयज-मानो हविर्भिः ।। अहेडमानोवरुणेहवोद्ध्युरुशꣳ समानऽआयुः प्रमोषीः।।

यस मन्त्रले सुरो फेरि तताउनू ।

स्रुवमुदङ्मुखम्-ॐ तमुत्त्वादध्यङ्ङृषिः पुत्रऽईधेऽअथर्वणः । वृत्रहणंपुरन्दरम्

यस मन्त्रले सुरो उत्तरतिर फर्काएर राख्नू ।

दक्षिणतः स्वसमीपे कुशोपरि निदध्यात् । पवित्राभ्यामाज्यं त्रिरुत्पवनम्- ॐ देवस्यत्वासवितुः प्प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रे-णसूर्यस्यरश्मिभिः ।। तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ।। ॐ प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयोनिष्टप्तꣳ रक्षोनिष्टप्ताऽ अरातयः-उर्वन्तरिक्षमन्नवेमि।।

यस मन्त्रले पवित्रद्वारा घिउ तीनपल्ट मास्तिर छर्किदिनू ।

आज्यमुत्थाप्य चरोः पूर्वेणनीत्वाग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यपश्चिमतो नीत्वाऽज्यस्योत्तरतः स्थापयेत् । आज्यमग्नेः पश्चादानीय स्थापयेत्-ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासि । प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥

यस मन्त्रले घिउको पात्र उचाली चरुको पूर्वबाट अग्निको उत्तरतिर राख्नू । चरुको पात्र उचाली घिउको पश्चिम पारेर राख्नू ॥

चरुमप्यानीय प्रदक्षिणं कारयित्वोत्तरतः स्थापयेत्-ॐ पशुभिः पशूनाप्नोति पुरोडाशैर्हवीꣳष्या ॥ छन्दोभिः सामधेनीर्याज्ज्याभिर्वषट्कारान्॥

यस मन्त्रले चरु प्रदक्षिणा गरेर उत्तरतिर राख्नू ।

आज्यावेक्षणम्-ॐ आपवस्वहिरण्यवदश्ववत्सोमवीरवत् । व्याजङ्गोमन्तमाभर स्वाहा ॥

यस मन्त्रले घिउमा हेर्नू ।

द्रव्यनिरीक्षणमपद्रव्ये सति तन्निरसनम्-ॐ आत्वाहार्षमन्तरभूर्भुव-स्तिष्ठा विचाचलिः ।। विशस्त्वासर्वावाञ्छन्तुमात्वद्राष्ट्रमधिभ्रशत्।।

यस मन्त्रले घिउमा केही परेको भए झिकेर फालिदिनू ।

चर्वाज्ये पवित्रं निधाय -ॐ विष्णोरराटमसिव्विष्णोःश्नप्त्रेस्थो-व्विष्णोः स्यूरसिविष्णोर्ध्रुवोसि ।। वैष्णवमसिविष्णवेत्वा ।।

यस मन्त्रले चरु र घिउमा पवित्र राख्नू ।

प्रोक्षणीपात्रस्थपवित्राभ्यां प्रणीतोदकेन आज्यमुत्पूय, प्रोक्षणीं च तेनासादितप्रोक्षणीपात्रस्थपवित्राभ्यां प्रणीतोदकेन आज्यमुत्पूय, प्रोक्षणीं च तेनासादितवस्तुसेचनम्- ॐ देवस्य-त्वासवितुः प्प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ।। अग्नीषो-माभ्यांत्वाजुष्टन्नियुनज्मि ।। अद्भ्यस्त्वौष-धीभ्यो नुत्वा-

मातामन्यतामनुपितानुभ्रातासगर्भ्योनुसखासयूत्थ्यः ।। अग्नीषोमाभ्यान्त्वाजुष्टम्प्रोक्षामि ।।

यस मन्त्रद्वारा प्रोक्षणीको पवित्रले प्रणीताको जलले सबै वस्तुमा सेचन गरिदिनू ।

ज्वलत्तृणादिना चरोराज्यस्याग्नेश्चरोरुपरि प्रदक्षिणक्रमेण भ्रामयित्वाग्नौ क्षिपेत्-ॐ धृष्टिरस्यपाग्नेऽअग्निमामादञ्जहिनिष्क्रव्यादँ सेधादेवयजंवह ।। ध्रुवमसिपृथिवीन्दृᳬ हब्रह्मवनित्वाक्षत्रवनिसजातवन्युपदधामिभ्रातृव्यस्यवधाय।।

यस मन्त्रले बल्दो काठ घिउ-चरुमाथि घुमाई अग्निमा होमिदिनू ।

ब्रह्मार्चनमर्घस्थापनपूर्वकम्-ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योतिव्याधीमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिःपुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरो जायतान्नि-कामेन्नि कामेनः पर्जन्योवर्षतुफलवत्योनऽओषधयः

पच्यन्तांयोगक्षेमोनः कल्पताम् ॥

यस मन्त्रले अर्घ स्थापन गरेर ब्रह्माको पूजा गर्नू ।

विष्ण्वर्चनम्- ॐ इदंविष्णुविचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरे स्वाहा ॥

यस मन्त्रले विष्णुको पूजा गर्नू ।

प्रजापतिपूजनम्-ॐ प्रजापतेनत्वदेतान्यन्न्योविश्वारूपाणिपरिताबभूवा ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳ स्यामपतयोरयीणाम् ॥

यस मन्त्रले प्रजापतिको पूजा गर्नू ।

दक्षिणां हिरण्यं वा निधाय-ॐ हिरण्यगर्भः समवर्तताग्रेभूतस्यजातः पतिरेक आसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम॥

यस मन्त्रले सबै स्थानमा दक्षिणा राखिदिनू ।

अग्निमर्चयेत् -ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥ तदेवशक्रन्तद्ब्रह्मताऽआपः सप्रजापतिः ॥

यस मन्त्रले अग्निको पूजा गरिदिनू ।

अन्यत् समिधादानम्-ॐ समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम्।। आस्मिन्हव्याजुहोतन ।।

यस मन्त्रले अघि राखेको बाहेक अर्को तीन टुक्रा समिधा घिउमा चोभेर अग्निमा होमिदिनू ।

वेदपूजनम्, पूर्वे-ॐ अग्निमीडेपुरोहितंयज्ञस्यदेवमृत्विजम् ।। होतारंरत्नधातमम् । ॐ ऋग्वेदाय नमः ।।

यस मन्त्रले पूर्वतिर ऋग्वेदको पूजा गरिदिनू ।

दक्षिणे- ॐ इषेत्वोर्जेत्वावायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ठतमाय-कर्मणऽआप्यायध्वमध्न्याऽइन्द्रायभागम्प्रजावतीरनमीमाऽअयक्ष्मामावस्तेन-ऽईशतमाघसꣳ सोध्रुवाऽअस्मिन् गोपतौस्यातबह्वीर्यजमानस्यपशून् पाहि ।। ॐ यजुर्वेदाय नमः ।।

पश्चिमे-ॐ अग्नऽआयाहिवीतयेगृणानोहव्यदातये ।। निहोतासत्सि-वर्हिषि । ॐ सामवेदाय नमः ।।

यस मन्त्रले पश्चिमतिर सामवेदको पूजा गर्नू ।

उत्तरे- ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये शंयोरभिस्रवन्तुनः।। ॐ अथर्ववेदाय नमः ।।

यस मन्त्रले उत्तरतिर अथर्ववेदको पूजा गर्नू ।

चरु ब्रह्मणे समर्पयेत्-ॐ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् भवावाजस्यसंगथे ।।

यस मन्त्रले चरु ब्रह्मालाई समर्पित गर्नू ।

ॐ चत्वारीत्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दो यज्ञपुरुषवैश्वानरपरमात्मा देवता अग्निप्रार्थने विनियोगः ।।

चत्वारिश्रृङ्गास्त्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥
त्रिधाब-द्धोवृषभोरोरवीतिमहोदेवोऽमर्त्या ॥२॥ आविवेश ॥

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् । सुवर्णममलं वन्हिं समिद्धं सर्वतोमुखम् ॥

स्वाहाशक्तियुताय अमुकनामाग्नये जातवेदसे नमः ॥

ॐ नमो यज्ञपुरुष वैश्वानर परमात्मादेवता ब्रह्मा ऋषिः कपिलवर्ण उष्णिक्छन्दो रुद्रोदेवता यजुर्वेदा ऋषयो होमे विनियोगः ॥

नारद उवाच-

प्राङ्मुखस्तु स्थितो वहिः प्राङ्मुखा एव ऋत्विजः । प्राङ्मुखा देवताः सर्वाः कथं प्रत्यङ्मुखो भवेत् ॥

ब्रह्मोवाच-

आवाहवेत् ततो वह्निं मन्त्रपूतेन वारिणा । अनलश्च जलं दृष्ट्वा भीत्या प्रत्यङ्मुखो भवेत्॥

नारद उवाच-

पावकस्य तु किं रूपं को वर्णः किं च लक्षणम् । शिरोबाहूदरङ्घ्रीणां चक्षुः श्रोत्रमुखस्य च ।

ब्रह्मोवाच–

पावकं द्विजरूपं च त्रिनेत्रं च चतुर्भुजम् । त्रिशिखं सप्तजिह्वं च पञ्चलक्षणसंयुतम् ।।
त्रिभागं तु मुखं तस्य अधिकं वक्त्रमुच्यते । उत्तरास्ये स्थितो विष्णुर्दक्षिणास्ये प्रजापतिः।।
मध्यवक्त्रे तु चेशान एवं ब्रह्म प्रभाषितम् । मूर्ध्नि चैव त्वहं ब्रह्मा मुखे चैव तु शङ्करः।
जिह्वायां संस्थितो विष्णुर्दंष्ट्रायां च ग्रहाः स्मृताः । नासायां देवताः सर्वाश्चक्षुषीन्दु-दिवाकरौ।।
ऋग्वेदो हृदयस्थाने बाह्वङ्गुल्योर्यजुस्तथा । उदरे कटिगुह्ये च सामवेदः प्रकीर्तितः ।।
अथवा जङ्घपादौ च ग्रीवायां प्रणवस्तथा । पृष्ठे चैव तु गायत्री एवं स्यात् तु षडङ्गकम्।।

हरकमलपिङ्गललोचनलोहिताक्षः सर्वपापप्रणाशनः । वैश्वानर-लक्षणम् कस्य पुत्रः ? कस्य कुलोत्पन्नः ? किं गोत्रः ? कः पिता? का माता ?

कात्यायनवचनात्- श्रृङ्गीगोत्रः, शाण्डिल्यः पिता, अरणी माता, उदानकुक्षिरूर्ध्वमुखं ललाटः ।

कालीं कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा ।
स्फुल्लिङ्गिनी विश्वधरा च चण्डी लोलायमाना इति सप्तजिह्वा ॥
त्रिशिखं च चक्रधरं साक्षसूत्रकमण्डलुम् । व्याघ्रहस्तं तथा पुष्पं गन्धाभरणभूषितम् ॥
अजास्कन्धसमारूढं कृष्णाजिनोत्तरीयकम् । ऋग्यजुः सामवेदानामथर्वध्वनिभूषितम् ॥
होमार्थं प्रार्थयेऽहं त्वां चर्वाज्याभ्वां हुताशन । तावत्तिष्ठात्र मे ब्रह्मन् यावत् कर्म समाप्यते॥

ॐ अमुकनामवैश्वानरदिव्यरूप आवाहितो भव ।

यहाँबाट अग्नि-प्रार्थनामा 'चत्वारीत्यस्य०' देखि 'अमुक नामक वैश्वानर अवाहितो भव' सम्म मन्त्रहरू पढ्दै हात जोर्नू ।

कर्मविशेषे अग्नेर्नामानि

अग्निश्च भरतो नाम गर्भाधाने विधीयते । तथा पुंसबने चैव सीमन्ते जातकर्मणि ॥
नाम्नि नै पार्थिवो वह्निः प्राशने तु शुचिः स्मृतः । चूडायां मङ्गलो नाम व्रतदाने समुद्भवः॥
गोदाने सूर्यनामा च विवाहे योजकस्तथा । शान्तिके दारुणो नाम पौष्टिके बलवर्धनः॥
आवस्थ्ये भवेदग्निरग्निष्टोमे प्रदायकः । वनदाहे दूतकाख्यः प्रकोष्ठे जठरः स्मृतः ॥
वायव्ये वरुणो नाम स्थावरे पावको भवेत् । क्रव्यादो मृतभक्षी च समुद्रे बडवानल ॥

गन्धपुष्पादिभिः अग्निं सम्पूजयेत् । आग्नेये, ॐ ब्रह्मणे नमः। नैर्ऋत्ये, ॐ पौष्टिकाय नमः । वायव्ये, ॐ बलवर्द्धनाय नमः । ईशाने, ॐ प्रजापतये नमः । मध्ये, ॐ विष्णवे नमः ।

अब अग्निको र दिशाहरूको पूजा गर्नू ।

वायव्यसंहितायाम्-

लौकिके पावको ह्यग्निः प्रथमः परिकीर्तितः । अग्निश्च मारुतो नाम गर्भाधाने विधीयते।।
तथा पुंसवने चैव शुभे कर्मणि शोभनः । सीमन्ते मङ्गलो नाम प्रगल्भे जातकर्मणि ।।
नाम्नि वै पार्थिवो वह्निः प्राशने शुचयः स्मृताः । सभ्यनामाथ चूडायां व्रतदाने समुद्भवः।।
वेदारम्भे हरिर्नाम राजपुत्रः समावृतौ । गोदाने सूर्यनामा च केशान्ते ह्यग्निरुच्यते ।।
वैश्वानरो विसर्गे तु विवाहे योजकस्तथा । चतुर्थ्यां तु शिखीनाम धृतिरग्निस्तु सामनी ।।
लक्षहोमे वह्निनामा कोटिहोमे हुताशनः । प्रायश्चित्ते विधिर्नाम पाकयज्ञे तु साहसः ।।
पूर्णाहुत्यां मृडोनाम शान्तिके दारुणस्तथा । पौष्टिके बलदश्चैव क्रोधाग्निश्चाभिचारिके।।
वश्यर्थे कामदो नाम वनदाहे तु वर्धनः । आवसन्थ्ये भवेदग्निर्होमे तु सम्प्रदायकः ।।
क्रव्यादो मृतभक्षी च समुद्रे बडवानलः । युगान्ते संक्षयो नाम संवर्तः प्रलये स्मृतः ।।

ब्राह्मणवरणम्- कुशतिलयवजलयुतगन्धपुष्पाक्षतताम्बूल-पूगीफल-वस्त्र-द्रव्याभरणादीन्यादाय पूर्वाभिमुखो भूत्वा प्रत्यङ्मुखान् ब्राह्मणान् निमन्त्रयेत्-

सङ्कल्पः-ॐ तत्सत् ३ ॐ विष्णुः ३ अद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो श्रीब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे युगे प्रह्लादाधिपत्ये मनौ सप्तमे सत्यत्रेताद्वापरान्ते कलौ कलियुगस्य प्रथमचरणे जम्बूद्वीपे भरतखण्डे आर्यावर्तान्तर्गते अमुकदेशे अमुकग्रामे अमुकनदीतीर्थादिसन्निधौ अमुकस्थाने इह पुण्यभूमौ षष्टिसंवत्सराणां मध्ये अमुकनामसंवत्सरे श्रीसूर्ये अमुकायनगते अमुकऋतौ मासानामुत्तमे अमुकमासे अमुकपक्षे

अमुकवासरान्वितायाम् अमुकतिथौ यथानाम-नक्षत्र-योग-लग्न-करण-मुहूर्तान्वितायाम् अमुकराशिस्थिते श्रीसूर्येअमुकराशिस्थिते चन्द्रमसि अमुकराशिस्थिते देवगुरौ अन्येषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषेण विशिष्टायाम् अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनामा अहं ममास्मिन् यावत्कर्मणो निर्विघ्नपरिसमाप्त्यर्थं दीपकलशगणेशपूजनपूर्वकं क्रियमाणे अमुककर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्मकर्तुं तथा तद्तद्विहितोपयोग्याचारकर्म कर्तुं च प्रतिदेवतामुखे साज्यभागान्तमाहवनीयद्रव्ययुतहोमकर्म कर्तुं चतुर्वेदोक्तमन्त्रजपपाठकर्म कर्तुं च नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षत-ताम्बूलपूगीफलवासोद्रव्याभरणादिभिर्गणपतिहोत्राचार्यत्वेन जापकपाठक-त्वेन च युष्मान् अहं वृणे ।

ब्राह्मणाः -ॐ वृताः स्मः ।

अब ब्राह्मण वरणमा जौ-तिल-कुश, चन्दन, सुपारी, वस्त्र, द्रव्यादि राखेर आफू पूर्वतिर फर्किई ब्राह्मणहरूलाई पश्चिम मुख राखेर संकल्प गर्नू ।

आचार्य प्रार्थना-

आचार्य त्वं यथा स्वर्गे शक्रादीनां वृहस्पतिः । तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रत ॥

ब्रह्म-प्रार्थना-

यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः । तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम॥

होतृ-प्रार्थना-

भगवन् सर्वधर्मज्ञ सर्वधर्मविदांवर । वितते मम यज्ञेऽस्मिन् ऋत्विक् त्वं मे मखे भव ॥

पूर्वे ऋग्वेदपारायणार्थम् -

ऋग्वेदः पद्मपत्राक्षो गायत्री सोमदैवतः । अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव॥

दक्षिणे यजुः पारायणार्थम्-

कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः । काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव॥

पश्चिमे सामपारायणार्थम्-

सामवेदस्तु पिङ्गाक्षो जाग्रतः शक्रदैवतः । भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव।।

उत्तरे अथर्वपारायणार्थम्-

बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः । वैशम्पायन विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ।।

अमुककर्मणि अमुकदेवताया अमुकमन्त्रजपकर्मकर्तुं युष्मानहं वृणे ।

ततो ब्राह्मणान् मधुपर्कादिना सम्पूज्य प्रार्थयेत्-

अनि आचार्य, ब्रह्मा, होता र चारै दिशामा चार वेद पाठ गर्नेहरूको पनि यथाक्रम हात जोरेर प्रार्थना गर्नू ।

ब्राह्मणाः सन्तु मे शस्ताः पापात् पान्तु समाहिता । वेदानां चैव दातारः पातारः सर्वदेहिनाम्।।

जपयज्ञैस्तथा दानैर्होमैश्च विविधैः पुनः । देवानां च पितॄणां च तृप्त्यर्थं याजकाः कृताः ।।

येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् । रक्षन्तु सततं येऽस्मान् जपयज्ञे व्यवस्थिताः ।।

ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् । येषाँ वाक्यामृतेनैव शुध्यन्ति मलिना जनाः ।।

पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः । सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥
श्रोत्रियाः सत्यवाचश्च वेदध्यानरताः सदा । यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ॥
अङ्गीकुर्वन्तु कर्मैतत् कल्पद्रुमसमाः स्थिताः । यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ॥
यत्कृपालोचनात् सर्वा ऋद्धयो वृद्धिमाप्नुयुः । मम यज्ञे सदा पूज्याः सन्तु वै नियमान्विताः ॥
अक्रोधनाः शौचपरा सततं ब्रह्मवादिनः । ब्रह्मध्यानरता नित्यं प्रसन्नमनसः सदा ॥
अदुष्टभाषिणः सन्तु मा सन्तु परनिन्दकाः । ममापि नियमा ह्येते भवन्तु भवतामपि ॥

पुण्याहवाचनम्- गन्धपुष्पाक्षतताम्बूलपूगीफलद्रव्यवस्त्रादिभिस्त्रींश्चतुरः पञ्च वा ब्राह्मणान् सम्पूज्य हस्ते फलादिकं गृहीत्वा-ॐ अद्येहाऽमुकगोत्रोऽ मुकप्रवरोऽमुकनामाहं ममामुककर्मणि पुण्याहवाचनार्थं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतपूगीफलवासोद्रव्यादिभिर्युष्मान् वृणे ।

ॐ तत्सत् ३ ॐ विष्णुः ३ इत्यादि देशकालौ स्मृत्वा –ॐ अद्येहाऽमुकगोत्रस्यामुकनाम्नः मम गृहेऽमुककर्मणि भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु पुण्याहं भवन्तो ब्रुवन्तु पुण्याहं भवन्तो ब्रुवन्तु।

ते च– ॐ पुण्याहम् ॐ पुण्याहम् ॐ पुण्याहम् । ॐ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः ।। पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा ।।

पुनः पूर्ववत्– ॐ अद्येहेत्यादि मम गृहेऽमुककर्मणि भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु ३ । ॐ स्वस्ति ३ ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ।।

अद्येहेत्यादि मम गृहेऽमुककर्मणि भो ब्राह्मणाः ऋद्धिं भवन्तो ब्रुवन्तु ३

ॐ ऋद्ध्यन्ताम् ३ । ॐ सत्रस्यऽऋद्धिरस्यगन्मज्योतिरमृताऽअभूम।। दिवंपृथिव्याऽअध्यारुहामाविदामदेवान्त्स्वर्ज्ज्योतिः ।।

ॐ अद्येहेत्यादि मम गृहेऽमुककर्मणि भो ब्राह्मणाः वृद्धिं भवन्तो ब्रुवन्तु ३ ॐ वृद्ध्यन्ताम् ३। ॐ ज्यैष्ठ्यञ्चमऽआधिपत्यञ्चमेमन्युश्च-मेभामश्च मेमश्चमेम्भश्चमेजेमाचमेमहिमाचमेवरिमा चमेप्रथिमाचमेवर्षिमा च मेद्राघिमाचमेवृद्धिश्चमेयज्ञेनकल्पन्ताम् ।।

ॐ अद्येह मम गृहेऽमुककर्मणि भो ब्राह्मणाः कल्याणं भवन्तो ब्रुवन्तु ३ । ॐ कल्याणम् ३ । ॐ यथेमांवाचङ्कल्याणीमावदानिज-नेभ्यः ।। ब्रह्मराजन्याभ्याँशूद्रायचार्यायचस्वायचारणायच ।। प्रियोदेवा-नांदक्षिणायैदातुरिहभूयासमयम्मेकामः समृद्ध्यतामुपमादोनमतु।।

ॐ अद्येह मम गृहेऽमुककर्मणि भो ब्राह्मणाः शान्तिं भवन्तो ब्रुवन्तु ३। ॐ शान्तिः ३ । ॐ द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ।। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व्वँ शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि।।

ॐ अद्येह मम गृहेऽमुककर्मणि भो ब्राह्मणाः श्रियं भवन्तो ब्रुवन्तु ३ । ॐ श्रीः ३ ।। ॐ मनसः काममाकूतिंवाचः सत्यमशीय।।

पशूनाँ रूपमन्नस्यरसोयशः श्रीः श्रयताम् ।।

ॐ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रुणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तु वः ।। भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु । रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा।।

पुण्याहवाचनसमृद्धिरस्तु ॥

अब पुण्याहवाचनमा चन्दन, अक्षता, फूल, सुपारी, द्रव्य, वस्त्रादिले तीन, चार अथवा पाँच ब्राह्मणहरूलाई पूजा गरेर दिनू, अनि हातमा कुनै फल लिएर हात जोर्नु । पुरोहितले संकल्प र मन्त्र मूल अनुसार भन्दै जानू । 'अमुक कर्मणि' भनेको स्थानमा जुन कामको लागि हवन गरिदैछ, त्यसैको उच्चारण गर्दै जानू । 'समृद्धिरस्तु' भनेपछि फूल-अक्षता र सुपारी यजमानलाई दिनू ।

दीपपूजनं प्रज्वालनम्- ॐ स्थिरोभववीड्वङ्गऽआशुर्भववाज्यर्वन् ॥ पृथुर्भवसुखदस्त्वमग्नेः पुरीषवाहणः ॥

यस मन्त्रले बत्ती बाल्नू ।

आवाहनम्- ॐ दीपनारायण इह आगच्छ इह तिष्ठ मम पूजां गृहाण । ॐ दीपनारायणाय नमः ।।

यस मन्त्रले आवाहन गर्नू ।

चन्दनाक्षतादिभिः पूजनम्-ॐ पृष्ठोदिविपृष्ठोऽअग्निःपृष्ठोपृथिव्यां पृष्ठोविश्वाऽओषधीराविवेश ।। वैश्वानरः सहसापृष्ठोऽअग्निः सनोदिवा-सरिषस्पातुनक्तम् ।।

यस मन्त्रले बत्तीको पूजा गर्नू ।

प्रार्थना- नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुवाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः ।।
नमः कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ।।
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तुते ।।
शुभं भवतु कल्याणमारोग्यं सुखसम्पदः । सर्वदुःखविनाशाय दीपज्योतिर्नमोऽस्तु ते ।।

यी मन्त्रहरूले बत्तीको प्रार्थना गर्नू ।

कलशस्थापनम्- ईशानदिग्भागे अव्रणं दध्यक्षतादिभूषितं तैजसं मृण्मयं वा कलशं धान्योपरि स्थापयेत् ।

अब ईशानतिर दही-अक्षतादिले सिंगारेको धातु वा माटोको कलश धानमाथि राख्नू ।

भूमिशोधनम्-ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्य भुवनस्य धर्त्री । पृथिवींयच्छपृथिवीन्दृꣳ हपृथिवीम्माहिꣳ सीः ॥

यस मन्त्रले भूमि-शोधन गर्नू ।

धान्यस्थापनम्-ॐ धान्यमसिधिनुहिदेवान् प्राणायत्वोदाना-यत्वाव्यानाय त्वा ॥ दीर्घामनुप्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिः प्रति गृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि ॥

यस मन्त्रले धान्य स्थापन गर्नू ।

कलशस्थापनम्-ॐ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ॥
पुनरूर्ज्जानिवर्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीः पुनर्म्माविशताद्रयिः॥

यस मन्त्रले धानको टपरीमाथि कलश थाप्नू ।

तीर्थादिजलम्- ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्क्कम्भसर्ज्जनीस्थो
वरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद॥
ॐ इमम्मेवरुणश्रुधीहवमद्ब्याचमृडय ॥ त्वामवस्युराचके ॥

यस मन्त्रले कलशमा तीर्थहरूको जल चढाउनू ।

गङ्गे च यमुने चैव गोदावरि सरस्वति! नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

सर्वौषधीः- ॐ याऽओषधीः पूर्वाजातादेवेब्भ्यस्त्रियुगं पुरा ॥
मनैनुबब्भ्रूणामहꣳ शतन्धामानिसप्तच ॥

यस मन्त्रले कलशमा सर्वौषधी चढाउनू ।

पञ्चरत्नानि–हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआ-
सीत् ।। सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ।।

यस मन्त्रले कलशमा पंचरत्न चढाउनू ।

पूगीफलादीनि – ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणी।।
बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳ हसः ।।

यस मन्त्रले कलशमा सुपारी चढाउनू ।

यवान्– ओषधयः समवदन्तसोमेनसहराज्ञा ।।
यस्मैकृणोतिब्राह्मणस्तꣳ राजन्पारयामसि

ॐ यवोसियवयास्मद्द्वेषोयवयारातीर्दिवेत्वान्तरिक्षायत्वापृथिव्यैत्वा०

यस मन्त्रले कलशमा जौ चढाउनू ।

गन्धम्-ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टांकरीषिणीम् ॥
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥
यस मन्त्रले कलशमा चन्दन चढाउनू ।
दूर्वा- ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ॥
एवानोदूर्वेप्रतनुसहस्त्रेणशतेनच ॥
यस मन्त्रले कलशमा दूवो चढाउनू ।
सप्तमृदः- ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी । यच्छानः शर्म्मसप्रथाः ।
यस मन्त्रले कलशमा सप्तमृत्तिका (सात स्थानको माटो) चढाउनू ।
पञ्चपल्लवैस्तन्मुखमाच्छादनम्-ॐ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥
यस मन्त्रले कलशमा पंचपल्लव चढाउनू ।

दध्यक्षतैर्भूषणम्-ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव। यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳ स्यामपतयोरयीणाम् ॥

यस मन्त्रले कलशलाई दही-अक्षता आदिले सिंगार्नू ।

वस्त्रयुग्मेनवेष्टनम्-ॐ बृहस्पतेऽअतियदर्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्रम्॥ उपयामगृहीतोसिबृहस्पतयेत्वैषतेयोनिर्बृहस्पतयेत्वा ॥

यस मन्त्रले कलशमा जोडा वस्त्र बेरिदिनू ।

आम्रपल्लवैस्तन्मुखमाच्छादनम्-ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥

यस मन्त्रले कलशमा आँपको पात चढाउनू ।

वरुणमावाह्य पूजयेत्-ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदासास्तेयजमानोहविर्भिः ।। अहेडमानोवरुणेहवोद्ध्युरुशᳪ समानऽआयुः प्रमोषीः।।

यस मन्त्रले कलशमा वरुणको आवाहन पूजा गर्नू ।

गङ्गादितीर्थान्यावाहयेत्-

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदाःनदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ।।

यस मन्त्रले कलशमा गङ्गादि तीर्थहरूको आवाहन र पूजा गर्नू ।

कलशं स्पृष्ट्वाभिमन्त्रयेत्-

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।।
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।।

अब कलशको चारैतिर छोएर मन्त्र पढ्दै जानू । अन्य चार कुनाका चार कलशमा चार समुद्रको पूजा गर्नू । यो विष्णु धर्मोत्तरको वचन हो ।

प्रार्थना–

देवदानवसंवादे मथ्यमाने महोधधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

यी मन्त्रहरूले कलशको प्रार्थना गर्नू ।

गणेशपूजनम्–ॐ अद्येह मम अमुककर्मणि निर्विघ्नपरिसमाप्त्यर्थं कर्माङ्गतया श्रीगणेशपूजनमहं करिष्ये ।

अब गणेशजीको पूजामा पहिले तिल-कुश लिएर संकल्प गर्नू ।

आवाहनम्–ॐ गणानान्त्वागणपतिꣳ हवामहे प्रियाणान्त्वाप्रियपतिꣳ

हवामहे निधीनान्त्वानिधिपतिꣳ हवामहे व्वसोमम ।। आहमजानि गर्ब्भधमात्त्वमजासिगर्ब्भधम् ।।

हेहेरम्ब त्वमेह्येहि अम्बिका त्र्यम्बकात्मज । सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभयुतः शिवः ।।
नागस्य नागहारत्वं गणराज चतुर्भुज । भूषितैः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः।।
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः । इहागत्य गृहाण स्वं पूजां कर्तुं च रक्ष माम्।।

ॐ भूर्भुवः स्वः गणपते सिद्धिबुद्धिसहितः सायुधः सवाहनः साङ्गः सपरिवार इह आगच्छ इह तिष्ठ मम (यजमानस्य) पूजां गृहाण यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव सुप्रसन्नो भव वरदो भव ।

ॐ भूर्भुवः स्वः गणपते सिद्धिबुद्धिसहिताय सायुधाय सवाहनाय सपरिवाराय इदमासनं समर्पयामि । ॐ गणपतये नमः ।

यी मन्त्रहरूले गणेशजीको आवाहन गर्नू ।

सहस्रशीर्षेत्यादि षोडशमन्त्रैः प्रतिऋग्भिः षोडशोपचारैः सम्पूजयेत्-

'सहस्रशीर्षा०' इत्यादि मन्त्रहरूले शोषडोपचारले गणेशजीको पूजा गर्नू ।

नारिकेलादिफलं सवस्त्रं पुरतः पात्रे निधाय स्तुतिं कृत्वाऽर्पयेत्-

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक । भक्तनामभयं कर्ता त्राता भव भवार्णवात् ॥
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो । वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥
अनेन फलदानेन फलदोऽस्तु सदा मम ॥

वस्त्रसहित नरिवल आदि केही फूल पात्रमा राखेर गणेशजीको स्तुति गरी चढाउनू ।

रक्षाबन्धनपूजनम्-दूर्वासर्षपचन्दनगोमयदधिसहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन् नारायणकवचं पठेत्-

पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः । याम्यां रक्षतु बाराहो नारसिंहस्तु नैर्ऋते ॥
बारुण्यां केशवो रशेत् वायव्यां मधुसूदनः । उत्तरे श्रीधरो रक्षेद् ऐशान्यां तु गदाधरः॥
ऊर्ध्वं गोवर्धनो रक्षेदधस्तात् तु महेश्वरः । एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः ॥

यज्ञाग्रे रक्षताच्छङ्खः पृष्ठे वै पद्ममुत्तमम् । वामपार्श्वे गदा रक्षेत् दक्षिणे च सुदर्शनम्।।
उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः । ऋग्वेदमच्युतो रक्षेद् यजुर्वेदमधोक्षजः ।।
कृष्णो रक्षतु सामानमथर्वाणं च माधवः । उपविष्टाँश्च विप्राँस्ताननिरुद्धोऽभिरक्षतु ।।
यजमानं सपत्नीकं पुण्डरीकाक्ष रक्षतु । रक्षाहीनं च यत् स्थानं तत्सर्वं रक्षताद् हरिः।।
वेदमन्त्रैस्तु कर्तव्या रक्षाशुभ्रैस्तु सर्षपैः । कृत्वा पोटलिकां पूर्वं बध्नीयाद् दक्षिणे करे।।

अब रक्षाबन्धन पूजामा दूबो, सरस्यूँ, चन्दन, गोबर र दही सहित रक्षा (डोरो) तामाको पात्रमा राखेर त्यो पात्रलाई छोई नारायण कवच पढ्नू ।

पूजयेत् -ॐ रक्षोहणंबलगहनंवैष्णवीमिदमहन्तंबलगमुत्किरामियम्मेसमानोयमसमा-नोवखानेदमहन्तंबलगमुत्किरामियम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तंबलगमुत्किरामियम्मे सजातोयमसजातोनिच खानोत्कृत्याङ्किरामि ।। ॐ स्वराडसिसपत्नहासत्रराडस्यभिमातिहा जनराडसि-रक्षोहासर्वराडस्यमित्रहा ।। ॐ रक्षोहणोवोब्बलगहनः प्रोक्षामिव्वैष्णवान्त्रक्षोहणोबोब्बलगहनोवनयामिव्वैष्णवान्त्रक्षोहणो

वोब्बलगहनोवस्तृणामिव्वैष्णवान्न-क्षोहणौवांब्बलगहनउपदधामि व्वैष्णवीरक्षोहणौबलगहनौपर्यहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवाःस्त्थ।। ॐसप्तऽऋषयः प्रतिहताः शरीरेसप्तरक्षन्ति सदमप्रमादम् ।। सप्तापः स्वपतोलोकमीयस्तत्रजागृतोऽअस्वप्नजौसत्रसदौ च देवौ ।।

अब वेदका मन्त्रहरू पढ्दै रक्षा बन्धनको पूजा गर्नू ।

ततः क्रमेण नाममन्त्रैः चन्दनाक्षतपुष्पधूपदीपादिभिः यथामिलितोपचारैः कलशे पूजयेत्-ॐ गणपते इहागच्छ इह तिष्ठ गणपतिं आवाहयामि स्थापयामि पूजयामि ॐ गणपतये नमः । ॐ सूर्य इहागच्छ इह तिष्ठ सूर्यम् आवाहयामि स्थापयामि पूजयामि ॐ सूर्याय नमः ।

ॐ देव्यै नमः । ॐ शिवाय नमः । ॐ विष्णवे नमः । ॐ विनायकाय नमः । ॐ दुर्गाय नमः । ॐ वायवे नमः । ॐ

आकाशाय नमः । ॐ अश्विनीकुमाराभ्यां नमः । ॐ सूर्याय नमः। ॐ सोमाय नमः । ॐ भौमाय नमः । ॐ बुधाय नमः । ॐ बृहस्पतये नमः । ॐ शुक्राय नमः । ॐ शनये नमः । ॐ राहवे नमः। ॐ केतुभ्यो नमः । ॐ ईश्वराय नमः । ॐ उमाय नमः । ॐ स्कन्दाय नमः । ॐ हरये नमः । ॐ ब्रह्मणे नमः । ॐ इन्द्राय नमः। ॐ यमाय नमः। ॐ कालाय नमः ! ॐ चित्रगुप्ताय नमः । ॐ अग्नये नमः। ॐ अद्भ्यो नमः । ॐ भूम्यै नमः । ॐ विष्णवे नमः। ॐ इन्द्राय नमः। ॐ इन्द्राण्यै नमः । ॐ प्रजापतये नमः । ॐ सर्पाय नमः । ॐ ब्रह्मणे नमः । ॐ इन्द्राय नमः । ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः । ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ सोमाय नमः । ॐ ईशानाय नमः । ॐ ब्रह्मणे नमः । ॐ अनन्ताय

ध्रुवाद्यष्टवसुभ्यो नमः । ॐ धात्रादिद्वादशादित्येभ्यो नमः । ॐ वीरभद्राद्येकादशरुद्रेभ्यो नमः । ॐ गौर्यादिषोडशमातृभ्यो नमः। ॐ आवहादि सप्तमरुद्भ्यो नमः । ॐ विनायकाय नमः । ॐ ब्रह्मणे नमः । ॐ विष्णवे नमः । ॐ रुद्राय नमः । ॐ अर्काय नमः । ॐ वनस्पते इहागच्छ इह तिष्ठ वनस्पतिं आवाहयामि स्थापयामि पूजयामि ॐ वनस्पतये नमः ॥

अब नामानुसार क्रमले चन्दन, अक्षता, फूल, धूप-दीप, नैवेद्य आदिले कलशमा पूजा गर्नू । यसमा 'गणपतये नमः' देखि, 'वनस्पतये नमः' सम्मका देवताहरूको पूजा गर्नुपर्दछ ।

होमसङ्कल्पो यवतिलकुशकर्मपात्रजलेन-हरिः ॐ तत्सत् ३ विष्णुः ३ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनामा अहं मम अमुककर्मणि आघाराज्यभागपूर्वकपञ्चवारुणीहोमपूर्वकं प्रधानभूतेभ्यो

देवेभ्यो गणपत्यादिपञ्चायतनेभ्यो विनायकादिपञ्चलोकपालेभ्यः सूर्यादिनवग्रहेभ्यः ईश्वरादि-अधिदेवेभ्यः अग्न्यादिप्रत्यधिदेवेभ्यः इन्द्रादिदशदिक्पालेभ्यो ध्रुवाद्यष्टवसुभ्यो धात्रादिद्वादशादित्येभ्यो वीरभद्राद्येकादशरुद्रेभ्यो गौर्यादिषोडशमातृभ्यः आवहादिसप्तमरुद्भयः विनायक-ब्रह्म-विष्णु-रुद्रार्कवनस्पतिभ्यः प्रधानदेवताभ्यस्तथा चतुः स्वस्तिभ्यः पयःपञ्चभ्यः षड्विष्णुभ्यो द्वादशदेवताभ्यो द्वादशशान्तिभ्यः षट्प्रातर्भ्यः षड्वातेभ्यः त्र्यनडुद्भ्यः पञ्चभगेभ्यः पञ्चेन्द्रियेभ्यः पञ्चवरुणेभ्यो गायत्र्यै सावित्र्यै सरस्वत्यै गृहमात्रे अन्नपूर्णायै महालक्ष्म्यै महारिष्टविनाशिन्यै चण्ड्यै मार्गदेवतायै (द्यौराल्यै) वास्तुदेवाय गोष्ठदेवतायै (गैडुदेवाय) क्षेत्रपालाय ग्रामदेवाय स्वर्गेन्द्राय पातालवासुकिभ्यो मित्रलोकपालाय मान्धात्रे तीर्थराजाय व्रतराजाय (पुनः) दिक्पालेभ्यः तिथिभ्यो नक्षत्रेभ्यो योगेभ्यो

वारेभ्यः करणेभ्यो वातेभ्यो मेघेभ्यः समुद्रेभ्यो नदीभ्यः इष्टदेवताभ्यः कुलदेवेभ्यः स्थापितदेवेभ्यो भैरवाय भैरव्यै विन्ध्यवासिन्यै स्थानविशेषाधिपतिदेवताभ्यः पञ्चपाण्डवेभ्यः पितृभ्यो वैश्वानराय उत्तराङ्ग भूर्भुवः स्वः अग्निवरुण-सवितृ-विष्णु-विश्वेदेवमरुत्स्वर्कप्रजापतिस्विष्टकृद्देवेभ्यः इदमाज्यादिहवनीयद्रव्यैर्यथासंख्यं ब्राह्मणद्वारा हवनं करिष्ये ॥

अब जौ-तिल-कुश र कर्मपात्रको जल लिएर होम संकल्प गर्नू ।

पवित्रेण प्रोक्षणीजलाभिमन्त्रणम्-ॐपृष्ठोदिविपृष्ठोऽअग्निः पृथिव्यांपृष्ठोविश्वाऽओषधीराविवेश ॥ वैश्वानरः सहसापृष्ठोऽअग्निः सनोदिवा सरिषस्पातुनक्तम् ॥

पवित्रले प्रोक्षणीपात्रको जल अभिमन्त्रित गर्नू ।

तज्जलेन दक्षिणतः अग्नेः पर्युक्षण-(सेचन) मन्त्रम्-ॐ सुसमिद्धाय शोचिषे घृतन्तीव्रंजुहोतन ।। अग्नये जातवेदसे ।।

त्यही प्रोक्षणीको जलले अग्निमा घुमाएर सेचन गरिदिनू ।

ततो उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा समिद्धतमेऽग्नौ इति पूर्वस्थापिता घृताक्ताः तिस्रः समिधः प्रक्षिप्य-ॐ समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम् ।। आस्मिन्हव्याजुहोतन।।

अब उपयमन कुश बायाँ हातमा लिएर मनमनै प्रजापतिको ध्यान गरी पहिले राखिएको तीन टुक्रा समिधा घिउमा चोभेरआगोमा हालिदिनू ।

सपवित्रप्रोक्षण्युदकमादाय तज्जलेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्यततो प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणा-ऽन्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाऽऽज्याहुतिंजुहोति तत्राधारादारभ्य

द्वादशहुतियुततत्तदाहुत्यन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः[१]-

अब पवित्र सहित प्रोक्षणीको जलले अग्निको प्रदक्षिणा गर्नू । अनि प्रणीता पात्रमा पवित्र राखेर बायाँ घुँडा मोरी कुशले ब्रह्माको स्पर्श गर्नू । अनि सुरोले केवल घिउको आहुति दिनू । यी बाह्र आहुतिमा सुरोको टुप्पामा स्थित घिउ प्रोक्षणी पात्रमा चोभिदिनू ।

ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम। -इति मनसा ।

यस मन्त्रले प्रजापतिलाई घिउको आहुति दिनू ।

१- वह्नेः प्रदीप्तज्वालायां जुहुयान्नान्यथा चरेत् । काष्ठे धूमेऽल्पज्वालायां भस्मनि दोषमाप्नुयात्।।
यत्र प्रज्वलितो वह्निस्तन्मुखं जातवेदसः । धृतधारां ततो दद्यात् यावत् स्विन्नो भवेच्चरुः।।
आस्यान्तर्जुहुयाद्वह्नेः पण्डितः सर्वकर्मसु । बधिरत्वं कर्णहोमे नेत्रे त्वन्धत्वमाप्नुयात्।।
नासिकायां मनः पीडा शिरोहोमे तु मृत्युदः ।।
यतः काष्ठं ततः श्रोत्रं यतो धूमोऽथ नासिका । यतोऽल्पज्वलनं नेत्रं यतो भस्मस्ततःशिरः।।

ॐ इन्द्रायेति प्रजापतिर्ऋषि स्त्रिष्टुप्छन्दः इन्द्रो देवता आज्यहोमे विनियोगः ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम । -इत्याधारौ ।

यस मन्त्रले इन्द्रलाई आहुति दिनू । घिउ चुहाउँदै लगेर अग्निमा दिइने आहुतिलाई 'आधार' भन्दछन् ।

ॐ अग्नये इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः। ॐ अग्नये स्वाहा इदमग्नयेन मम। प्रोक्षणीपात्रेऽपि क्षिपेत्।।

यस मन्त्रले अग्निलाई आहुति दिनू र सबैमा प्रोक्षणी पात्रमा सुरो चोभनू ।

ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः । ॐ सोमाय स्वाहा इदं सोमाय न मम । आज्यभागौ अग्नेरुत्तरतः ज्वालायाम् । प्रोक्षणीपात्रे प्रक्षिपेत् सर्वत्र ।

यस मन्त्रले अग्निको उत्तरतिरको ज्वालामा आहुति दिनू । प्रोक्षणी पात्रमा सुरोको टुप्पा चोभिदिनू ।

ॐ महाव्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्नि-वायुसूर्या देवता अग्न्याधाने विनियोगः ।

ॐ भूः स्वाहा इदमग्नये न मम । ॐ भुवः स्वाहा इदं वायवे न मम ।। ॐ स्वः स्वाहा इदं सूर्याय न मम ।

अब महाव्याहृतिमा अग्नि, वायु र सूर्यलाई विनियोग पढेर आहुति दिनू ।

पञ्चवारुणीहोमः- ॐ त्वन्नोऽअग्न इति वामदेव ऋषिरग्निवरुणौ देवते त्रिष्टुप्छन्दः प्रायश्चित्त-आज्यहोमे विनियोगः ।। ॐ त्वन्नोऽअग्ने वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ।। यजिष्ठोवह्नितमः शोशुचानोव्विश्वाद्वेषाᳬसि प्रमुमुग्ध्यस्मत् स्वाहा ।। इदमग्निवरुणाभ्याम् न मम।।

अब विनियोग सहित मन्त्र पढेर अग्नि वरुणलाई आहुति दिनू ।

ॐ सत्वन्नोऽअग्न इत्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निवरुणौ देवते प्रायश्चित्त आज्यहोमे विनियोगः । ॐ सत्वन्नोऽअग्नेवमौभवोतीने दिष्टोऽअस्याऽउषसोव्युष्टौ ।। अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳ सुहवोनऽएधि स्वाहा ।। इदमग्निवरुणाभ्याम् न मम ।।

अब फेरि विनियोग सहित मन्त्र पढेर अग्नि-वरुणलाई आहुति दिनू ।

ॐ अयाश्चाग्न इत्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः ।। ॐ अयाश्चग्नेस्यनग्नेशस्तिपाश्चसत्त्वमित्त्वमयाऽअसि ।। अयानोयज्ञंवहास्ययानोधेहिभेषज ꣳस्वाहा ।। इदमग्नये न मम ।।

अब विनियोग र मन्त्र पढेर केवल घिउको आहुति अग्निलाई दिनू ।

ॐ येतेशतमित्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दो वरुण-सवितृ-विष्णु-विश्वे देव-मरुत्स्वर्क्का देवताः प्रायश्चित्तहोमे विनियोगः ।। ॐ येतेशतं

वरुणंयेसहस्त्रंयज्ञियाः पाशाविततामहान्तः ।। तेभिर्नोऽअसवितोत-द्विष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्क्काः स्वाहा । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्क्केभ्यो न मम ।।

अब वरुण, सूर्य, विष्णु, विश्वेदेव, मरुत् र अर्कलाई आहुति दिनू ।

ॐ उदुत्तममिति शुन शेफऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः । ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳ श्रथाय ।। अथाव्वयमादित्यव्व्रतेतवानागसोऽअदितयेस्याम स्वाहा । इदं वरुणाय न मम ।। एताः प्रायश्चित्तसंज्ञकाः ।।

विनियोग सहित यस मन्त्रले वरुणलाई आहुति दिनू ।

प्रधानदेवताहोमः- ॐ गणानान्त्वागणपतिꣳ हवामहेप्रियाणान्त्वा-

प्रधानदेवताहोमसूत्राणि-

गणेशो भास्करो देवी शिवो विष्णुश्च पञ्चमः । पञ्चायतननामानः कथिताः पञ्च देवताः।।
विनायकस्तथा दुर्गा वायुराकाश एव च । नासत्यदस्रौ पञ्चैते लोकपालाः प्रकीर्तिताः ।।
सूर्यः सोमश्च भौमश्च बुधो जीवश्च भार्गवः । शनी राहुश्च केतुश्च कथिताश्च नव ग्रहाः।।
ईश्वरश्च उमा स्कन्दो विष्णुर्ब्रह्मा शचीपति। यमः कालश्चित्रगुप्त इत्येता अधिदेवताः।।
अग्निरापो धरा विष्णुरिन्द्र ऐन्द्री प्रजापतिः । सर्पा ब्रह्मा क्रमात् प्रोक्ता नव प्रत्यधिदेवताः।।
इन्द्राग्नी यमनिर्ऋती वरुणो मरुतो विधुः । ईशो ब्रह्मा तथानन्तो दिक्पालाः परिकीर्तिताः।।
ध्रुवाद्या अष्टवसवो धात्रादित्यास्तु द्वादशः । वीरभद्राद्येकादश गौर्यादि मातृषोडशः ।।
आवहादिमरुत्सप्त विनायकविधी हरिः । रुद्रश्चार्कस्तथा प्रोक्तो वनस्पतिः क्रमेण हि।।
चतुःस्वस्ति पयः पञ्च षड्विष्णुर्देवद्वादशः । शान्तिर्द्वादश षड्प्रातः षड्वाताश्च क्रमेण हि।।
अनुडुत्संज्ञको ज्ञेयो होमकर्मणि वै ध्रुवम् । भगपञ्चेन्द्रियाः पञ्च वरुणा पञ्च एव च।।
गायत्री चैव सावित्री वाग्देवी गृहमातृकाः । अन्नपूर्णा महालक्ष्मीर्महारिष्टविनाशिनी ।।
चण्डी द्यौरालिका ज्ञेया वास्तुभूम्योश्च देवते । गेडुश्च क्षेत्रपालश्च ग्रामदेवस्ततः परम्।।
स्वर्गेन्द्रो वासुकिश्चैव मित्रलोकस्तथैव च । मान्धाता तीर्थराजश्च व्रतराजस्ततः परम्।।

प्रियपतिꣳ हवामहेनिधीनान्त्वानिधिपतिꣳ हवामहेव्वसोमम।। आहमजा निगर्ब्भधमात्त्वमजासिगर्ब्भधम् ।। ॐ गणपतये स्वाहा इदं गणपतये न मम ।।१।।

अब प्रधान देवताको हवनमा पहिले गणपतिलाई घिउ र चरुको आहुति दिनुपर्दछ ।

पुनर्दिक्पालका ज्ञेयास्तिथिनक्षत्रयोगकाः । वारश्च करणश्चैव वाता मेधाः समुद्रकाः ।।
नदीष्टकुलदेवाश्च स्थापिता देवताः क्रमात् । भैरवी भैरवो विन्ध्यवासिनी स्थानदेवताः।।
एपोह सर्वदेवेति शुक्रज्योतिस्तथैव च । पाण्डवाः पितरश्चैव वैश्वानरः क्रमेण च ।।
पूर्णपात्रं ततो दद्यात् बर्हिर्होमस्ततः परम् । गोभूरत्नहिरण्यानि रौप्यवस्त्राणि चैव हि ।।
देयानि द्विजमुख्येभ्यो यजमानैर्विशेषतः ।। इति होमसूत्राणि ।

---

१. यत्र मन्त्रः स्वाहान्तो भवेत् तत्र स्वाहाशब्दो न प्रयोज्यः । मन्त्रेणैव देवताय उक्तत्वात् पुनर्गणपतये स्वाहेति नोच्चारणीयः किन्तु स्वाहान्तं मन्त्रमुक्त्वा 'इदं गणपतये न मम' इत्युच्चारः कर्तव्य इति याज्ञिकानां समाचार एवमन्यत्रापि । मन्त्रोच्चारणाभावे तु ॐ गणपतये स्वाहेति वक्तव्यमेव ।

यस्मिन्मन्त्रे न पठितः स्वाहाकारो भवेद्यदि ।। स्वाहान्तेन प्रयोक्तव्यो होमे च प्रणवादिकः।। प्रयोगरत्ने ।

ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।। ॐ सूर्याय स्वाहा इदं सूर्याय।।२।।

यस मन्त्रले सूर्यलाई आहुति दिनू ।

ॐ देवीर्द्वारऽइन्द्रवीड्सङ्घातेद्वीर्यामन्नवर्द्धयन् ।। आवत्सेनतरुणेनकुमारेणचमीवतापार्वाणद्रेणुककाटन्नुदन्तांवसुवनेवसुधेयस्यव्यन्तुयज।। ॐ देव्यै स्वाहा इदं देव्यै ।।३।।

यस मन्त्रले देवीलाई आहुति दिनू ।

ॐ नमः शम्भवायचमयोभवायचनमः शङ्करायचमयस्करायचनमः शिवायचशिवतरायच ।। ॐ शिवाय स्वाहा इदं शिवाय ।।४।।

–अत्र प्रणीतोदकस्पर्शः ।

यस मन्त्रले शिवलाई आहुति दिएर सुरोको टुप्पो प्रणीतामा चोभिदिनू ।

ॐ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि वैष्णवमसिविष्णवेत्वा ।। ॐ विष्णवे स्वाहा इदं विष्णवे ।।५।।

यस मन्त्रले विष्णुलाई आहुति दिनू ।

पञ्चलोकपालाः- ॐ गणानान्त्वागणपतिꣳ हवामहेप्रियाणान्त्वाप्रिय-पतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ।। आहमजा-निगर्ब्भधमात्त्वमजासिगर्ब्भधम् ।। ॐ विनायकाय स्वाहा इदं विनायकाय ।।

अब पंचलोकपालको आहुतिमा प्रथम विनाकायकलाई आहुति दिनू ।

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ।। ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ।। ॐ दुर्गायै स्वाहा इदं दुर्गायै ।।७।।

अब दुर्गालाई आहुति दिनू ।

ॐ ब्वायोयेतेसहस्रिणोरयासस्तेभिरागहि ।। नियुत्वान्त्सोमपीतये।।
ॐ वायवे स्वाहा इदं वायवे ।।८।।

यस मन्त्रले वायुलाई आहुति दिनू ।

ॐ ऊद्ध्र्वाऽअस्यसमिधोभवन्त्यूर्ध्वाशुक्राःशोचीᳬंष्यग्ने ।। द्युमत्तमासुप्रतीकस्यसूनोः ।। ॐ आकाशाय स्वाहा इदमाकाशाय।।९।।

यस मन्त्रले आकाशलाई आहुति दिनू ।

ॐ अश्विनोर्ब्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्यभैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियै यशसेभिषिञ्चामि।।
ॐ अश्विनीकुमाराभ्यां स्वाहा इदमश्विनीकुमाराभ्याम् ।।१०।।

यस मन्त्रले अश्विनी कुमारलाई आहुति दिनू ।

नवग्रहाः –ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ।। हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ।। ॐ सूर्याय स्वाहा इदं सूर्याय ।।११।।

अब नवग्रहमा पहिले यो मन्त्रले सूर्यलाई आहुति दिनू ।

ॐ इमन्देवाऽअसपत्नꣳ सुवध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानरा ज्याऽयेन्द्रस्येन्द्रियाय ।। इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवो मीराजासोमोस्माकम्ब्राह्मणानाꣳराजा ।। ॐ सोमाय स्वाहा इदं सोमाय।।१२।।

यस मन्त्रले सोम (चन्द्रमा) लाई आहुति दिनू ।

ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ।। अपाꣳरेताँसिजिन्वति ।। ॐ भौमाय स्वाहा इदं भौमाय ।।१३।।

यस मन्त्रले भौम (मंगल) लाई आहुति दिनू ।

ॐ उद्बुध्यस्वाग्नेप्रतिजागृहित्त्वमिष्टापूर्तेसꣳ सृजेथामयञ्च ।।
अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ।।
ॐ बुधाय स्वाहा इदं बुधाय ।।१४।।

यस मन्त्रले बुधलाई आहुति दिनू ।

ॐ बृहस्पतेऽअतियदर्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्रम् ।। उपयामगृहीतोसिबृहस्पतयेत्वैषतेयोनिर्बृहस्पतयेत्वा ।। ॐ बृहस्पतये स्वाहा इदं बृहस्पतये ।।

यस मन्त्रले बृहस्पति (गुरु) लाई आहुति दिनू ।

ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः।।
ऋतेनसत्यमिन्द्रियंविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु।।
ॐ शुक्राय स्वाहा इदं शुक्राय ।।१६।।

यस मन्त्रले शुक्रलाई आहुति दिनू ।

ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ।। शंयोरभिस्रवन्तुनः।।
ॐ शनैश्चराय स्वाहा इदं शनैश्चराय ।।१७।।

यस मन्त्रले शनिश्चरलाई आहुति दिनू ।

ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ।। कयाशचिष्ठयावृता।।
ॐ राहवे स्वाहा इदं राहवे ।।१८।।

यस मन्त्रले राहुलाई आहुति दिनू ।

ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ।। समुषद्भिरजायथा।।
ॐ केतवे स्वाहा इदं केतवे ।।१९।। इति नवग्रहाः ।।

यस मन्त्रले केतुलाई आहुति दिनू ।

अधिदेवताः –ॐ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ।। उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ।। त्र्यम्बकंयजामहेसुगन्धिम्पतिवेदनम्।।

उर्वारुकमिवबन्धनादितोमुक्षीयमामुतः।।ॐ ईश्वराय स्वाहा इदमीश्वराय।।२०।।
अत्र प्रणीतोदकः स्पर्शः ।[१]

अब अधिदेवतामा पहिले ईश्वरलाई आहुति दिनू र सुरोको टुप्पा प्रणीताको जलमा चोभिदिनू ।

ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्।।
इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।।२१।।

ॐ उमायै स्वाहा इदमुमाय ।।

यस मन्त्रले उमालाई आहुति दिनू ।

ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् ।। श्येनस्य-

---

१- रोदन्तं राक्षसं पित्र्यमासुरश्चाभिचारिकम् ।। उक्त्वा मन्त्रं स्पृशेदापः आलभ्यात्मानमेव च।।

पक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्वन् ।।२२।। ॐ स्कन्दाय स्वाहा इदं स्कन्दाय ।।

यस मन्त्रले स्कन्दलाई आहुति दिनू ।

ॐ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि।। वैष्णवमसिविष्णवेत्त्वा ।।२३।। ॐ विष्णवे स्वाहा इदं विष्णवे ।।

यस मन्त्रले विष्णुलाई आहुति दिनू ।

ॐ ब्रह्मजज्ञानम्प्रथम्मपुरस्ताद्विसीमतः सुरुचोवेनऽआवः ।। सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ।। ब्रह्मणे स्वाहा इदं ब्रह्मणे ।।

यस मन्त्रले ब्रह्मालाई आहुति दिनू ।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहव शूरमिन्द्रम् ।। ह्वयामिशक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ।। इन्द्राय स्वाहा इदमिन्द्राय।।

यस मन्त्रले इन्द्रलाई आहुति दिनू ।

ॐ यमायत्वामखायत्वासूर्यस्यत्वातपसे ।। देवस्त्वासवितामद्ध्वानक्तुपृथिव्याः सꣳस्पृशस्पाहि ।। अर्च्चिरसिशोचिरसितपोसि ।।२६।।

ॐ यमाय स्वाहा इदं यमाय । अत्र प्रणीतोदकस्पर्शः ।

यस मन्त्रले यमलाई आहुति दिएर सुरोको टुप्पो प्रणीताको जलमा डुबाउनू ।

ॐ कार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ।। समापोऽअद्भिरग्मतसमोषधीभिरोषधीः ।।२७।। ॐकालाय स्वाहा इदं कालाय । अत्र प्रणीतोदकस्पर्शः ।।

यस मन्त्रले काललाई आहुति दिई सुरोको टुप्पो प्रणीताको जलमा चोभनू ।

ॐ इन्धानास्त्वाशतꣳहिमाद्युमन्तꣳसमिधीमहि ।। वयस्वन्तोवयस्कृतꣳ सहस्वन्तः सहस्कृतम् ।। अग्नेसपत्नदम्भनमदब्धासोऽअदाभ्यम् ।। चित्रावसोस्वस्तितेपारमशीय ।।२८।। ॐ चित्रगुप्ताय स्वाहा इदं चित्रगुप्ताय ।। अत्र प्रणीतोदकस्पर्शः ।। इत्यधिदेवताः ।।

यस मन्त्रले चित्रगुप्तलाई आहुति दिएर सुरोको टुप्पो प्रणीताको जलमा पखाल्नू ।

प्रत्यधिदेवताः- ॐ अग्निन्दूतंपुरोदधेहव्यवाहमुपब्रुवे ।। देवाँ ।।२।। ऽआसादयादिह ।।२९।। ॐ अग्नये स्वाहा इदमग्नये ।।

अब प्रत्यधिदेवताको हवनमा पहिले अग्निलाई आहुति दिनू ।

ॐ अप्स्वग्नेसधिष्टवसौषधीरनुरुद्ध्यसे ।। गर्भेसञ्जायसेपुनः।३०। अद्भ्यः स्वाहा इदमद्भ्यः ।।

यस मन्त्रले अद्भ्यःलाई आहुति दिनू ।।

ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानः शर्म्मसप्रथाः ॥३१॥ ॐ भूम्यै स्वाहा इदं भूम्यै ॥

यस मन्त्रले भूमिलाई आहुति दिनू ।

ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा॥३२॥ ॐ विष्णवे स्वाहा इदं विष्णवे ॥

यस मन्त्रले विष्णुलाई आहुति दिनू ।

ॐ सजोषाऽइन्द्रसगणोमरुद्भिः सोमम्पिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ ॥२॥ रपमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनः ॥ उपयामगृहीतोसीन्द्रायत्वामरुत्वतऽएषतेयोनिरिन्द्रायत्वामरुत्वते ॥३३॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय ॥

यस मन्त्रले इन्द्रलाई आहुति दिनू ।

ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः । पूषासिघर्म्मायदीष्व ॥३४॥ ॐ इन्द्राण्यै स्वाहा इदमिन्द्राण्यै ॥

यस मन्त्रले इन्द्राणीलाई आहुति दिनू ।

ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ॥३५॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये ॥

यस मन्त्रले प्रजापतिलाई आहुति दिनू ।

ॐ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेब्भ्यः सर्पेब्भ्योनमः ॥३६॥ ॐ सर्पेभ्यः स्वाहा इदं सर्पेभ्यः ॥

यस मन्त्रले सर्पहरूलाई आहुति दिनू ।

सबुध्न्याऽउपमाऽअस्यब्विष्ठाः सतश्चयोनिमसतश्चविवः ॥३७॥ ॐ ब्रह्मने स्वाहा इदं ब्रह्मणे ॥ इति प्रत्यधिदेवता ॥

यस मन्त्रले ब्रह्मालाई आहुति दिनू । प्रत्यधि देवताको हवन सकियो ।

दिक्पालाः -ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳशूरमिन्द्रम्॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥३८॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय ॥

अब दिक्पालहरूको हवनमा पहिले इन्द्रलाई आहुति दिनू ।

ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ॥२॥ऽआसा-दयादिह।३९। ॐ अग्नये स्वाहा इदमग्नये ॥

यस मन्त्रले अग्निलाई आहुति दिनू ।

ॐ यमायत्वामखायत्वासूर्यस्यत्वातपसे ।। देवस्त्वासवितामध्वानक्तु-
पृथिव्याः सꣳस्पृशस्प्पाहि ।। अर्च्चिरसिशोचिरसितपोसि ।।४०।।
ॐ यमाय स्वाहा इदं यमाय ।। अत्र प्रणीतोदकस्पर्शः ।

यस मन्त्रले यमलाई आहुति दिएर सुरोको टुप्पो प्रणीतामा चोभिदिनू ।

ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ।। अन्य-
मस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ।।४१।। ॐ निर्ऋतये
स्वाहा इदं निर्ऋतये । अत्र प्रणीतोदकस्पर्शः ।

यस मन्त्रले निर्ऋतिलाई आहुति दिई सुरोको टुप्पो प्रणीताको जलमा चोभिदिनू ।

ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थोव्वरुणस्यऽ
ऋतसदन्य सिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद ।।४२।।
ॐ वरुणाय स्वाहा इदं वरुणाय ।

यस मन्त्रले वरुणदेवलाई आहुति दिनू ।

ॐ वायोयेतेसहस्त्रिणोरथासस्तेभिरागहि ।। नियुत्वान्त्सोमपीतये ।।४३।। ॐ वायवे स्वाहा इदं वायवे ।।

यस मन्त्रले वायुलाई आहुति दिनू ।

ॐ सोमोधेनुꣳसोमोऽअर्वन्तमाशुꣳसोमोवीरङ्कर्म्मण्यन्ददाति ।। सादन्यंविदत्थ्यꣳ सभेयम्पितृश्रवणंयोददाशदस्मै ।।४४।। ॐ सोमाय स्वाहा इदं सोमाय ।।

यस मन्त्रले सोमलाई आहुति दिनू ।

ॐ तमीशानञ्जगतस्तस्थुषस्प्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् ।। पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ।।४५।। ॐ ईशानाय स्वाहा इदमीशानाय ।। अत्र प्रणीतोदकस्पर्शः ।

यस मन्त्रले ईशानलाई आहुति दिएर प्रणीतामा सुरोको टुप्पो चोभिदिनू ।

द्वादशादित्याः- ॐ यज्ञोदेवानाम्प्रत्येतिसुम्नमादित्यासोभवतामृडयन्तः।। आवोर्वाचीसुमतिर्वृवर्त्यादꣳ होश्चिद्यावरिवोवित्तरासदादित्येभ्यस्त्वा।। ॐ धात्रादिद्वादशादित्येभ्यः स्वाहा इदं धात्रादिद्वादशादित्येभ्यः ।।

यस मन्त्रले धात्रादि बाह्र आदित्यलाई आहुति दिनू ।

एकादशरुद्राः- ॐ य एतावन्तश्चभूयाꣳ सश्चदिशोरुद्रावितस्थिरे।। तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ।।५०।। ॐ वीरभद्राद्येकादशरुद्रेभ्यः स्वाहा इदं वीरभद्राद्येकादशरुद्रेभ्यः ।। अत्र प्रणीतोदकस्पर्शः ।।

यस मन्त्रले वीरभद्रादि एकादश रूद्रलाई आहुति दिएर सुरो प्रणीताको जलमा चोभिदिनू।

षोडश मातरः-ॐ गौरीमिमासलिलानितक्षत्येकपदीद्विपदीत्रिपदी साचतुष्पदी ।। अष्टापदीनवपदीबभूवुषिसहस्राक्षरीपरमेव्योमन् ।।५१।। ॐ गौर्यादिषोडशमातृभ्यः स्वाहा इदं गौर्यादिषोडशमातृभ्यः ।।

यस मन्त्रले गौर्यादि षोडश मातृकाहरूलाई आहुति दिनू ।

सप्त मरुतः –ॐ मरुतोयस्यहिक्षयेपाथादिवोविमहसः ।। ससुगोपातमोजनः ।। ॐ आवहादिसप्तमरुद्भ्यः स्वाहा इदं आवहादिसप्तमरुद्भ्यः।

यस मन्त्रले आवहादि सप्तमरुतलाई आहुति दिनू ।

विनायकादयः षट्–ॐ गणानान्त्वागणपतिꣳ हवामहेप्रियाणान्त्वाप्रियपतिꣳ हवामहेनिधीनान्त्वानिधिपतिꣳ हवामहेव्वसोमम ।। आहमजानिगर्भधमात्वमजासिगर्भधम् ।। विनायकाय स्वाहा इदं विनायकाय।।

अब विनायकादि षट्मा पहिलो आहुति विनायकलाई दिनू ।

ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः ।। सबुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः ।।५४।। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ।।

ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्त्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि वैष्णवमसिविष्णवेत्वा ॥५५॥ ॐ विष्णवे स्वाहा इदं विष्णवे ॥

यस मन्त्रले विष्णुलाई आहुति दिनू ।

ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः॥ मानोवीरान्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्वाहवामहे ॥५६॥

ॐ रुद्राय स्वाहा इदं रुद्राय ॥ अत्र प्रणीतोदकस्पर्शः ।

यस मन्त्रले रुद्रलाई आहुति दिएर सुरोको टुप्पा प्रणीताको जलमा चोभिदिनू ।

ॐ अग्निरस्मिजन्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआसन् ॥ अर्क्कस्त्रि-धातूरजसोविमानोजस्त्रोघर्मोहविरस्मिनाम ॥५७॥ ॐ अर्काय स्वाहा इदमर्काय ।

यस मन्त्रले अर्कलाई आहुति दिनू ।

ॐ वनस्पतेवीड्वङ्गोहिभूयाऽअस्मत्सखाप्रतरणः सुवीरः ।। गोभिः सन्नद्धोऽअसिव्वीडवस्वास्त्थातातेजयतुजेत्वानि ।।५८।। ॐ वनस्पतये स्वाहा इदं वनस्पतये ।।

यस मन्त्रले वनस्पतिलाई आहुति दिनू । अनि जुन उद्देश्यले हवन गरेको छ, त्यो विशेष कार्य सकेर अनि फेरि यहाँबाट हवन गर्नू ।

अत्र विशेषोद्देश्याभिमतं कर्म कृत्वा तत्पश्चादेतदुत्तरं कर्म कुर्वन्ति।

चतुः स्वस्त्यादयः-ॐ स्वस्तिनऽइन्द्रोवृद्धश्श्रवाः स्वस्तिनः पूषाविश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्द्दधातु ।।१।। ॐ चतुः स्वस्तिभ्यः स्वाहा इदं चतुः स्वस्तिभ्यः ।।

यस मन्त्रले चतुः स्वस्तिलाई आहुति दिनू ।

ॐ पयःपृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ।। पयस्वतीः-
प्रदिशःसन्तुमह्यम् ।।२।। ॐ पयः पञ्चभ्यः स्वाहा इदं पयः पञ्चभ्यः ।।

यस मन्त्रले पयः पञ्चलाई आहुति दिनू ।

ॐ विष्णोररराटमसिविष्णोः श्नप्त्रेस्त्थोविष्णोः स्यूरसिविष्णोर्ध्रु-
वोसि ।। वैष्णवमसिविष्णवेत्वा ।।३।। षड्विष्णुभ्यः स्वाहा इदं षड्विष्णुवभ्यः।

यस मन्त्रले षड्विष्णुलाई आहुति दिनू ।

ॐ अग्निर्देवतावातोदेवतासूर्योदेवताचन्द्रमादेवतावसोदेवता रुद्रा-
देवतादित्यादेवतामरुतोदेवताविश्वेदेवादेवता वृहस्पतिर्देवतेन्द्रोदेवतावरुणो-
देवता ।।४।। ॐ द्वादशदेवेभ्यः स्वाहा इदं द्वादशदेवेभ्यः ।।

यस मन्त्रले द्वादश देवताहरूलाई आहुति दिनू ।

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः

शान्तिः॥वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ।।५।। द्वादशशान्तिभ्नभ्यः स्वाहा इदं द्वादशशान्तिभ्यः ।।

यस मन्त्रले द्वादश शान्तिलाई आहुति दिनू ।

प्रातरग्निम्प्रातरिन्द्रꣳहवामहेप्रातर्म्मित्राव्वरुणाप्प्रातरश्विपा ।। प्रातर्भगम्पूषणम्ब्रह्मणस्पतिम्प्रातः सोममुतरुद्रꣳ हुवेम ।।६।। ॐ षट्प्रातर्भ्यः स्वाहा इदं षट्प्रातर्भ्यः ।।

यस मन्त्रले षट्प्रातःलाई आहुति दिनू ।

ॐ समुद्राद्रायत्वावातायस्वाहासरिरायत्वाव्वातायस्वाहा ।। अनाधृष्यायत्वाव्वातायस्वाहा ।। अवस्यवेत्वाव्वातायस्वाहाशिमिदायत्वाव्वातायस्वाहा ।।७।। इदं षड्वातेभ्यः ।।

यस मन्त्रले षड्वायुलाई आहुति दिनू ।

अनड्वान्वयः पंक्तिश्छन्दोधेनुर्व्वयोजगतीच्छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दो-दित्यवाड्वयोविराट्छन्दः पञ्चाविर्वयोगायत्रीछन्दस्त्रिवत्सोव्वयऽउष्णिक्-छन्दस्तुर्यवाड्वयोनुष्टुप्छन्दोलोकन्ताऽइन्द्रम् ॥८॥ ॐ त्र्यनडुद्भ्यः स्वाहा इदं त्र्यनडुद्भ्यः ॥

यस मन्त्रले तीन अनडुहहरूलाई आहुति दिनू ।

ॐ भगऽएवभवाँ॥२॥ऽअस्तुदेवास्तेनव्ययम्भगवन्तः स्याम ॥ तन्त्वा-भगसर्व्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह॥९॥ ॐ पञ्चभगेभ्यः स्वाहा इदं पञ्चभगेभ्यः ॥

यस मन्त्रले पञ्चभगलाई आहुति दिनू ।

ॐ प्राणायस्वाहापानायस्वाहाव्यानायस्वाहा ॥ चक्षुषेस्वाहाश्रोत्राय-स्वाहा वाचेस्वाहामनसेस्वाहा ॥१०॥ ॐ पञ्चेन्द्रियेभ्यः स्वाहा इदं पञ्चेन्द्रियेभ्यः ॥

यस मन्त्रले पाँच इन्द्रियहरूलाई आहुति दिनू ।

ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद ॥११॥ ॐ पञ्चवरूणेभ्यः स्वाहा इदं पञ्चवरूणेभ्यः ॥

यस मन्त्रले पाँच वरुणलाई आहुति दिनू ।

ॐ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्युष्णिहाककुप्सूचीभिः शम्म्यन्तुत्वा ॥१२॥ ॐ गायत्र्यै स्वाहा इदं गायत्र्यै ॥

यस मन्त्रले गायत्रीलाई आहुति दिनू ।

ॐ उपयामगृहतोसिसावित्रोसिचनोधाश्चनोधाऽअसिचनोमयिधेहि॥ जिन्वयज्ञञ्जिन्वयज्ञपतिभगायदेवायत्वासवित्रे ॥१३॥ ॐ सावित्र्यै स्वाहा इदं सावित्र्यै ॥

यस मन्त्रले सावित्रीलाई आहुति दिनू ।

ॐ सरस्वतीयोन्याङ्गर्भमन्तरश्विभ्याम्पत्नीसुकृतम्बिभर्ति ॥ अपाꣳ रसेनवरुणोनसाम्नेन्द्रꣳ श्रियैजनयन्नप्सुराजा ॥१४॥ ॐ सरस्वत्यै स्वाहा इदं सरस्वत्यै ॥

यस मन्त्रले सरस्वतीलाई आहुति दिनू ।

ॐ गृहामाबिभीतमावेपद्ध्वमूर्ज्जम्बिभ्रतऽएमसि ॥ ऊर्ज्जम्बिभ्रद्वः सुमनाः सुमेधागृहानैमिमनसामोदमानः ॥ ॐ गृहमात्रे स्वाहा इदं गृहमात्रे॥

यस मन्त्रले गृहमातृकालाई आहुति दिनू ।

ॐ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारन्तारिषऽऊर्ज्जन्नो धेहिद्विपदेचतुष्पदे ॥१६॥ ॐ अन्नपूर्णायै स्वाहा इदमन्नपूर्णायै ॥

यस मन्त्रले अन्नपूर्णालाई आहुति दिनू ।

ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥

इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥१७॥ ॐमहालक्ष्म्यै स्वाहा इदं महालक्ष्म्यै ॥

यस मन्त्रले महालक्ष्मीलाई आहुति दिनू ।

ॐ देवीर्द्वारऽइन्द्रꣳ सङ्घातेवीड्वीर्यामन्नवर्द्धयन् ॥आवत्सेनतरुणेन-कुमारेणचमीवतापार्वाणꣳ रेणुककाटन्नुदन्तांवसुवनेवसुधेयस्यव्यन्तुयज ॥१८॥ ॐ महारिष्टविनाशिन्यै स्वाहा इदं महारिष्टविनाशिन्यै ॥

यस मन्त्रले महारिष्टविनाशिनीलाई आहुति दिनू ।

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥१९॥ ॐ चण्ड्यै स्वाहा इदं चण्ड्यै॥

यस मन्त्रले चण्डिका देवीलाई आहुति दिनू ।

ॐ द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्‌वृहद्वयः ।। अविरासीत्पिलि-
प्पिलारात्रि रासीत्पिशङ्गिला ।।२०।। ॐ मार्गदेवतायै स्वाहा इदं मागदेवताय ।।

यस मन्त्रले भार्गदेवतालाई आहुति दिनू ।

ॐ वसोः पवित्रमसिशतधारं व्वसोः पवित्रमसिसहस्रधारम् ।। देवस्त्वासवितापुनातुवसोः पवित्रेणशतधारेणसुप्वाकामधुक्षः ।।२१।। ॐ वास्तुदेवाय इदं वास्तुदेवाय ।।

यस मन्त्रले वास्तुदेवतालाई आहुति दिनू ।

ॐ भूम्योऽआखूनालभतेन्तरिक्षायपाङ् क्त्रान्दिवेकशान्दिग्भ्योनकुला-
न्वभ्रुकानवान्तरदिशाभ्यः ।। ॐ भूमिदेवाय स्वाहा इदं भूमिदेवाय।।

यस मन्त्रले भूमिदेवतालाई आहुति दिनू ।

ॐ नमः शम्भवायचमयोभवायचनमः शङ्करायचनमस्करायचनमः शिवायचशिवतरायच ।।२३।। ॐ गोष्ठदेवाय स्वाहा इदं गोष्ठदेवाय।।

यस मन्त्रले गोष्ठ देवतालाई आहुति दिनू ।

ॐ क्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसि ।। मात्वाहिꣳसीन्मामाहिꣳसीः।२४। ॐ क्षेत्रपालाय स्वाहा इदं क्षेत्रपालाय ।।

यस मन्त्रले क्षेत्रपाललाई आहुति दिनू ।

ॐ यद्ग्रामेयदरण्येयत्सभायांयदिन्द्रिये ।। यदेनश्चकृमाव्वयमिदन्तदवयजामहे ।।२५।। ॐ ग्रामदेवाय स्वाहा इदं ग्रामदेवाय ।।

यस मन्त्रले ग्रामदेवतालाई आहुति दिनू ।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ।। ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ।।२६।। ॐ स्वर्गेन्द्राय ।। स्वाहा

ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु ।। येऽअन्तरिक्षेयेदिवितेभ्यःसर्पेभ्यो नमः ।।२७।। ॐ पातालवासुकिभ्यः स्वाहा इदं पातालवासुकिभ्यः।।

यस मन्त्रले पातालवासुकीलाई आहुति दिनू ।

ॐ मित्रोनऽएहिसुमित्रऽइन्द्रस्योरुमाविशदक्षिणमुशन्नुशन्तः स्योनः स्योनम् ।। स्वानब्भ्राजाङ्घारेबम्भारेहस्तसुहस्तकृशानवेतेवः सोमक्रयणास्तान्त्रक्षद्ध्वम्मावोदभन् ।।२८।। ॐ मित्रलोकपालाय स्वाहा इदं मित्रलोकपालाय ।।

यस मन्त्रले मित्रलोकपाललाई आहुति दिनू ।

ॐ राजन्तमद्ध्वराणाङ्गोपामृतस्यदीदिविम् ।। वर्द्धमानः स्वेदमे।।२९।। ॐ मान्धात्रे स्वाहा इदं मान्धात्रे ।।

यस मन्त्रले मान्धातालाई आहुति दिनू ।

ॐ येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः ।। तेषाञ्सहस्रयोजने- वधन्वा नितन्मसि ।।३०।। ॐ तीर्थराजाय स्वाहा इदं तीर्थराजाय ।।

यस मन्त्रले तीर्थराजालाई आहुति दिनू ।

ॐ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् ।। दक्षिणाश्रद्धामाप्नोति- श्रद्धयासत्यमाप्यते ।।३१।। ॐ व्रतराजाय स्वाहा इदं व्रतराजाय ।।

यस मन्त्रले व्रतराजालाई आहुति दिनू ।

ॐ प्राच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहादक्षिणायैदिशेस्वाहार्वाच्यैदिशेस्वा- हाप्रतीच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहोदीच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहोर्ध्वायै- दिशेस्वाहार्वाच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहा।। ॐपुनर्दिक्पालेभ्यःस्वाहा इदं पुनर्दिक्पालेभ्यः ।।३२।।

यस मन्त्रले पुनर्दिक्पालहरूलाई आहुति दिनू ।

ॐ अग्ने:पक्षतिर्व्वायोर्न्निपक्षतिरिन्द्रस्यतृतीयासोमस्यचतुर्थ्यदित्यै- पञ्चमीन्द्राण्यैषष्ठीमरुताᳬसप्तमीबृहस्पतेरष्टम्यर्यम्णोनवमीधातुर्दश- मीन्द्रस्यैका-कादशीवरुणस्यद्वादशीयमस्यत्रयोदशी ॥३३॥ ॐ तिथिभ्यः स्वाहा इदं तिथिभ्यः ॥

यस मन्त्रले तिथिहरूलाई आहुति दिनू ।

ॐ नक्षत्रेब्भ्यः स्वाहानक्षत्रियेब्भ्यः स्वाहाहोरात्रेब्भ्यः स्वाहार्द्धमा- सेब्भ्यः स्वाहामासेब्भ्यः स्वाहाऽऋतुब्भ्यः स्वाहार्त्तब्भ्यः स्वाहासंवत्सरा- यस्वाहाद्यावापृथिवीब्भ्याᳬस्वाहाचन्द्रायस्वाहा सूर्यायस्वाहारश्मिब्भ्यः स्वाहावसुभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्योदेवेभ्यः स्वाहामूलेभ्यः स्वाहा शाखाब्भ्यः स्वाहावनस्पतिभ्यः स्वाहापुष्पेभ्यः स्वाहा- फलेभ्यःस्वाहौषधीभ्यः स्वाहा ॥ ॐ नक्षत्रेभ्यः स्वाहा इदं नक्षत्रेभ्यः॥

यस मन्त्रले नक्षत्रहरूलाई आहुति दिनू ।

ॐ योगेयोगेतवस्तरंवाजेवाजेहवामहे ।। सखायऽइन्द्रमूतये ।।३५।।
ॐ योगेभ्यः स्वाहा इदं योगेभ्यः ।।

यस मन्त्रले योगहरूलाई आहुति दिनू ।

ॐ आदित्यङ्गर्भम्पयसासमङ् ग्धिसहस्रस्यप्रतिमांविश्वरूपम् ।। परिबृङ्ग्धिहरसामाभिमꣳ स्त्थाः शतायुङ्कृणुहिचीयमानः ।।३६।।
ॐ वारेभ्यः स्वाहा इदं वारेभ्यः ।।

यस मन्त्रले वारहरूलाई आहुति दिनू ।

ॐ भद्द्रङ्कर्णेभिः श्रृणुयामदेवाभद्द्रम्पश्येमाक्षभिर्यजत्राः ।। स्थिरैरङ्गैस्तुष्टुवा ꣳ सस्तनूभिर्व्यशेमहिदेवहितं यदायुः ।।३७।। ॐ करणेभ्यः स्वाहा इदं करणेभ्यः ।।

यस मन्त्रले करणहरूलाई आहुति दिनू ।

ॐ वायोयेतेसहस्त्रिणोरथासस्तेभिरागहि ।। नियुत्वान्त्सोमपीतये।।३८।।
ॐ वातेभ्यः स्वाहा इदं वातेभ्यः ।।

यस मन्त्रले वायुहरूलाई आहुति दिनू ।

व्वातायस्वाहाधूमायस्वाहाभ्रायस्वाहामेघायस्वाहाव्विद्योतमानायस्वाहास्त नयतेस्वाहा वस्फूर्ज्जतेस्वाहा व्वर्षतेस्वाहा ववर्षतेस्वाहोग्रंवर्षते स्वाहाशीघ्रं-वर्षतेस्वाहोद्गृह्णतेस्वाहोद्गृहीतायस्वाहाप्रुष्णतेस्वाहा शीकायतेस्वाहा-प्रुष्वाभ्यः स्वाहाह्रादिनीभ्यः स्वाहानीहारायस्वाहा ।। इदं मेघेभ्यः।।३९।।

यस मन्त्रले मेघहरूलाई आहुति दिनू । कहीं-कहीं मन्त्रमा परेका प्रत्येक स्वाहामा आहुति दिने चलन पनि पाइन्छ ।

ॐ समुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳ सवितारङ्गच्छस्वाहामित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाछन्दाꣳसिगच्छस्वाहाद्यावापृथिवी गच्छस्वाहा

यज्ञंगच्छस्वाहा सोमङ्गच्छस्वाहा दिव्यन्नभोगच्छस्वाहाग्निंब्वैश्वानरङ्गच्छस्वाहा मनोमेहार्द्दियच्छदिवन्तेधूमोगच्छतु स्वर्ज्योतिः पृथिवीम्भस्मनापृणस्वाहा ॥ इदं समुद्रेभ्यः ॥४०॥

यस मन्त्रले समुद्रहरूलाई आहुति दिनू ।

ॐ नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्योनैषादम्पुरुषव्यघ्रायदुर्म्मदङ्गन्धर्वाप्सरोभ्य व्रात्यम्प्रयुग्भ्यऽउन्मत्तꣳ सर्प्प देवजनेभ्यः प्प्रतिपदमयेभ्यः कितवमीर्यतायाऽअकितवंपिशाचेभ्योविदलकारींयातुधानेभ्यः कण्टकीकारीम् ॥ ॐ नदीभ्यः स्वाहा इदं नदीभ्यः ॥४१॥

यस मन्त्रले नदीहरूलाई आहुति दिनू ।

ॐ इष्टोयज्ञोभृगुभिराशीर्दावसुभिः ।। तस्यनऽइष्टस्यप्रीतस्यद्रविणेहागमेः ।। ॐ इष्टदेवाय स्वाहा इदमिष्टदेवाय ।।४२।।

यस मन्त्रले इष्टदेवतालाई आहुति दिनू ।

ॐ कुलायिनीघृतवतीपुरन्धिःस्योनेसीदसदनेपृथिव्याः ।। अभित्वारुद्द्रावसवोगृणन्त्विमाब्रह्मपीपिहिसौभगायाश्विनाध्वर्यूसादयतामिहित्वा।।ॐ कुलदेवाय स्वाहा इदं कुलदेवाय ।।४३।।

यस मन्त्रले कुलदेवतालाई आहुति दिनू । त्यसपछि स्थापित गरेका देवताहरूलाई आहुति दिनू ।

यत्रस्थापितो यो देवस्तं तन्मन्त्रेण होमयेत्-

ॐ नमः शम्भवाय चमयोभवायचनमः शङ्करायचमयस्करायचनमः शिवायचशिवतरायच ।।४४।। ॐ भैरवाय स्वाहा इदं भैरवाय ।।

यस मन्त्रले भैरवलाई आहुति दिनू ।।

ॐ देवीर्द्वार ऽइन्द्रᳬसङ्घातेवीड्व्वीर्यामन्नवर्धयन् ।। आवत्सेनतरुणेन-कुमारेणचमीवतापार्वाणᳬ रेणुककाटन्नुदन्तांवसुवनेवसुधेयस्यव्यन्तुयज।।४५।।
ॐ भैरव्यै स्वाहा इदं भैरव्यै ।।

यस मन्त्रले भैरवीदेवीलाई आहुति दिनू ।

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ।। ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ।। विन्ध्यवासिन्यै स्वाहा इदं विन्ध्य-वासिन्यै।। स्थानविशेषाधिष्ठिता देवा देव्यश्च तत्तन्मत्रेण होमयेत्-

यस मन्त्रले विन्ध्यवासिनी देवीलाई आहुति दिनू । अनि निवासस्थानका अधिष्ठाता देवी र देवताहरूलाई तिनका मन्त्र पढ्दै आहुति दिनू ।

सर्वदेवम्- ॐ एषोहदेवः प्रदिशोनुसर्वाः पूर्वोहजातः सऽउगर्भेऽअन्तः।। सऽएवजातः सजनिष्यमाणः प्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः ।।४७।।

ॐ सर्वेभ्यो देवेभ्यः स्वाहा इदं सर्वेभ्यो देवेभ्यः ॥

यस मन्त्रले सबै देवताहरूलाई एक आहुति दिनू ।

ॐ शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्माँश्च॥ शुक्रश्चऽ-ऋत पाश्चात्यॐ हाः ॥४८॥ ॐ सर्वहोमपूर्णाय स्वाहा इदं सर्वहोमपूर्णाय॥

यस मन्त्रले सर्वहोम पूर्णार्थ एक आहुति दिनू ।

ॐ राजन्तमध्वराणाङ्गोपामृतस्यदीदिविम् ॥ बर्द्धमानꣳ स्वेदमे ॥४९॥ ॐ पञ्चपाण्डवेभ्यः स्वाहा इदं पञ्चपाण्डवेभ्यः ॥

यस मन्त्रले पाँच पाण्डवहरूलाई एक आहुति दिनू ।

ॐ उग्रश्चभीमश्चध्वान्तश्चधुनिश्च ॥ सासस्वाँश्चाभियुग्वाचव्विक्षिपः ॥५०॥ ॐ भीमसेनाय स्वाहा इदं भीमसेनाय ॥

यस मन्त्रले भीमसेनलाई एक आहुति दिनू ।

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्य स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ।। अक्षन्पितरोमीमदन्त-पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ।।५१।। ॐ पितृभ्यः स्वाहा इदं पितृभ्यः ।। अत्र प्रणीतोदकस्पर्शः ।

यस मन्त्रले पितृहरूलाई एक आहुति दिएर प्रणीताको जलमा सुरोको टुप्पो चोभिदिनू।

वैश्वानरम्- ॐ ऋतावानंवैश्वानरमृतस्यज्योतिषस्पतिम् ।। अजस्रङ्घर्ममी महे ।। उपयामगृहीतोसिवैश्वानरायत्वैषतेयोनिर्वैश्वा-नरायत्वा। ॐ वैश्वानराय स्वाहा इदं वैश्वानराय ।।

ॐ वैश्वानरस्यसुमतौस्यामराजाहिकम्भुवनानामभिश्रीः ।। इतोजा-तोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्येण ।। उपयामगृहीतोऽसिवैश्वानराय त्वैषतेयोनिर्वैश्वानरायत्वा ।। ॐ वैश्वानराय स्वाहा इदं वैश्वानराय ।

ॐ वैश्वानरोनऽऊतयऽआप्रयातुपरावतः अग्निरुक्त्थेनवाहसा।। उपयामगृहीतोसिवैश्वानरायत्वैषतेयोनिर्वैश्वानरायत्वा ।।५४।। ॐ वैश्वानराय स्वाहा इदं वैश्वानराय ।।

यी तीन मन्त्रहरूले वैश्वानरलाई आहुति दिनू ।

ॐ आकाशे यानि लिङ्गानि यानि लिङ्गानि भूतले ।
पाताले यानि लिङ्गानि सर्वलिङ्ग नमोऽस्तु ते स्वाहा ।।

उत्तराङ्गमहाव्याहृतिहोमादिः-ॐ महाव्याहृतीनाम्प्रजापतिर्ऋषिरग्नि-वायु सूर्या देवता गायत्र्युष्णिगनुष्टुप्छन्दांसि आज्यहोमे विनियोगः ।। ॐ भूः स्वाहा इदमग्नये न मम । न ममेति सर्वत्र । प्रोक्षणीपात्रे क्षिपेत्

सर्वत्र । ॐ भुवः स्वाहा इदं वायवे ।। ॐ स्वः स्वाहा इदं सूर्याय।।

अब उत्तराङ्ग होममा घिउमात्र आहुति दिनू । त्यसमा विनियोग पढेर अग्नि, वायु, सूर्यलाई एकेक आहुति दिई प्रोक्षणी पात्रको जलमा सुरोको टुप्पो पखाल्नू ।

ॐ त्वन्नोऽअग्न इति वामदेवऋषिरग्निवरुणौ देवते त्रिष्टुप्छन्दः आज्यहोमे विनियोगः ।। ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडो-ऽअवया सिसीष्ठा ।। यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाᳬसिप्रमुमुग्ध्य स्मत् ।। ॐ अग्निवरुणाभ्याँ स्वाहा इदमग्निवरुणाभ्याम्।।

विनियोग पढेर अग्नि-वरुणलाई एक आहुति दिनू ।

ॐ सत्वन्नोऽअग्न इति वामदेवऋषि स्त्रिष्टुप्छन्दोग्निवरुणौ देवते आज्यहोमे निनियोगः ।। ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्टोऽअस्याऽउ

षसोव्युष्टौ ।। अवयक्ष्वनोवरुणꣳ रराणोव्वीहिमृडीकꣳ सुहवोनऽएधि स्वाहा इदमग्निवरुणभ्याम् ।।

फेरि विनियोग सहित मन्त्र पढेर अग्निवरुणलाई अर्को आहुति दिनू ।

ॐ आयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः ।। ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च्चसत्वमित्वमयाऽअसि ।। अयानोयज्ञंव्वहास्ययानोधेहिभेषजꣳ स्वाहा इदमग्नये।।

अब विनियोग सहित अग्निलाई एक आहुति दिनू ।

ॐ येतेशतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणसवितृविष्णुविश्वेदेवमरुत्स्वर्क्का देवताः सर्वप्रायश्चित्तहोमे विनियोगः ।। ॐ येतेशतंवरुणंये सहस्रंयज्ञियापाशावितत्तामहान्तः ।। तेभिर्नोऽअद्यसवितोतद्विष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्क्काः स्वाहा इदं वरुणाय

सवित्रे विष्णवे विश्वभ्यो देवेभ्यो मरुभ्द्भ्यः स्वर्केभ्यः ॥

विनियोग सहित विष्णु, विश्वेदेव, मरुत्, अर्कलाई एक आहुति दिनू ।

ॐ उदुत्तममिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः ॥ ॐ उदुत्तमंवरुणपाशस्मदवाधमंविमध्यमꣳ श्रथाय ॥अथाव्वयामादित्यव्रतेतवानागसोऽअदितयेस्याम ॥ ॐ वरुणाय स्वाहा इदं वरुणाय ॥

फेरि विनियोग र मन्त्र पढेर वरुणलाई एक आहुति दिनू ।

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये । इति मनसा ।

ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ॥

अब विनियोग पढेर प्रजापतिलाई एक आहुति दिनू । अनि सुरोको टुप्पामा लागेको घिउ यजमानलाई पातमा दिनू र यजमानले जिभ्रोमा लगाई आचमन गर्नू।

संस्रवप्राशनम्- होता, ॐ अद्येहेत्यादि कृतस्याऽमुककर्मणः परिपूर्णतासिद्ध्यर्थं मृडनामाग्नौ पूर्णाहुतिं होमयिष्ये ।

ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥ कविꣳ सम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः स्वाहा ॥

अब होताले पूर्णाहुतिको संकल्प गरेर मन्त्र पढी अग्निमा घिउको धारा चढाइदिनू ।

स्रुवसम्पूजनम्- ॐ स्रुचश्चमेचमसाश्चमेवायव्यानिचमेद्रोणकलश्च-मेग्ग्रावाणश्चमेधिषवणेचमेपूतभृच्चमऽआधवनीयश्चमेवेदिश्चमे बर्हिश्च मेवभृथश्चमेस्वगाकारश्चमेषज्ञेनकल्पन्ताम् ॥

यस मन्त्रले सुरोको पूजा गरिदिनू ।

पूर्णपात्रम्- रौप्यं ताम्रं, मृण्मयं वा यत्सम्भवं यज्ञोपवीत-फल-वस्त्र-द्रव्य-सहितं तण्डुलं षट्पञ्चाशदधिकद्विशतमुष्टिपरिमितं वा बहुभोक्तृ-

पुरुषाहारपरिमितं तत्पूर्णपात्रं ब्राह्मणं चापि त्रिः सम्पूज्य- ॐ पूर्णादर्विपरापत-सुपूर्णा पुनरापत ।। वस्नेवविक्रीणावहाऽइषमूर्ज्जꣳ शतक्रतो ।।

अब पूर्णपात्र चांदीको, तामाको वा माटोको जुन सम्भव हुन्छ- त्यसमा जनै, वस्त्र, द्रव्य समेत दुइसय छप्पन्न मुठी चामल नसके यौटा धेरै खानसक्ने पुरुषको आहार बराबर चामलले भरिएको पात्र र ब्राह्मणको पनि यस मन्त्रले पूजा गरिदिनू ।

ॐ अद्येहेत्याद्यस्मिन्नमुककर्माङ्गभूतहोमकर्मणि कृताकृतावेक्षणरूप-ब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।। स्वस्ति-प्रतिवचनम् ।

अनि संकल्प गरेर पूर्णपात्र ब्राह्मणलाई दिनू र ब्राह्मणले 'स्वस्ति' भन्नू ।

प्रणीताविमोकः-ॐ सुमित्रियानऽआपऽओषधयः सन्तु ।।

पवित्राभ्यां प्रणीतोदकेन कर्तुः शिरसि सम्मृज्य-ॐ दुर्म्मित्रियास्तस्मै-सन्तुषोस्मान्द्वेष्टियञ्चवयंद्विष्मः ।। ऐशान्यां प्रणीतापात्रं न्युब्जीकुर्यात्।

'सुमित्रियान' पढेर पवित्रले कर्ताको शिर मुसारिदिनू । अनि फेरि 'दुर्मित्रिया०' मन्त्र पढेर ईशानतिर प्रणीता घोप्टाइदिनू ।

आस्तरणक्रमेणैव बर्हिरुत्थाप्य, आज्येनाऽभिधार्य हस्तेनैव होमयेत्-ॐदेवागात्वित्यस्य मनसस्पतिर्ऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनियोगः ।। ॐ देवागातुविदोगातुंवित्वागातुमित ।। मनसस्पतऽइ-मन्देवयज्ञꣳ स्वाहा वातेधाः ।।

पहिले बिछाएके क्रमले बर्हि उठाएर घिउमा चोभी मन्त्र पढ्दै अग्निमा आहुति दिनू ।

महाबलिः - माषतण्डुलाद्यन्नकुंकुमादिगन्धरक्तपुष्पादियुतं सदीपं सवस्त्रं सदक्षिणं सजलं क्षेत्रपालाय दद्यात् - ॐ क्षेत्रपालाय भूत-प्रेत-

पिशाच-राक्षस-शाकिनी-डाकिनी-बेतालादिपरिवारयुताय इमं बलिं समर्पयामि ।। भो भो क्षेत्रपाल ! इमं बलिं गृहाण मम यजमानस्यायुःकर्ता क्षेमकर्ता वरदस्तुष्टिदो भव ।। बलिं शूद्रेण वा ब्राह्मणेन चतुष्पथे विसर्जयेत् । आचार्यः प्रक्षालितपाणिपाद आचामेत् । मेधाकरणम्-

महाबलिमा माष-चामल वा अन्य अन्न चन्दन रातो पुष्प र बत्ती बाली दक्षिणा र जल सहित क्षेत्रपाललाई दिनू । मन्त्र पढ्दै यजमानको शिरमा घुमाएर ब्राह्मण वा शूद्रलाई दिई चौबाटोमा राख्न लगाउनू ।

घृतपूर्णस्त्रुवे नारिकेलं पूगीफलादिकचन्दनपुष्पाणि निधाय घृतधारया होमयेत् ॐ सदसस्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्यम् ।। सनिम्मेधामया सिषङ्स्वाहा ।।

ॐ याम्मेधान्देवगणाः पितरश्चोपासते ।। तयामामद्यमेधयाग्नेमे-
धाविन ङ्कुरूस्वाहा ।।२।। ॐ मेधाम्मेवरुणोददातुमेधामग्निः
प्रजापतिः।। मेधामिन्द्रश्चवायुश्चमेधान्धाताददातुमे स्वाहा ।।३।। ॐ
पूर्णादर्विपरा-पतसुपर्णापुनरापत ।। वस्नेवविक्रीणावहाऽइषमूर्ज्जꣳ शतक्रतो
।।४।। ॐ इदम्मेब्रह्मचक्षत्रञ्चोभेश्रियमश्नुताम् ।। मयिदेवादधतु
श्रियमुत्तमान्तस्यैते स्वाहा ।।५।।

आचार्यले हात-पाउ धोई आचमन गरेर मेधा गर्नू । त्यसमा नरिवल, सुपारी, फल-चन्दन पुष्पादि राखेर घिउको धारा लाग्नेगरी आहुति दिनू र पुरोहितले मेधाका पाँच मन्त्र पढेर 'स्वाहा' भन्नू ।

यजमानः सपरिवारो बन्धुवर्गैः सह घृताक्तवस्त्रचन्दनपुष्पफलचर्वादि-भिरग्निं पूजयेत्-ॐ एधोस्येधिषिमहिसमिदसितेजोसितेजोमयिधेहि।

समावर्तिथिवी समुषाः समुसूर्यः समुविश्वमिदञ्जगत् ।। वैश्वानरञ्ज्योति-
र्भूयासंविभून्कामान्व्यश्नवै भूः स्वाहा ।।१।।

यस मन्त्रले यजमानले आफ्ना बन्धुवर्ग सहित चन्दन, वस्त्र, फूल र चरु आदिले अग्निको पूजा गर्नू ।

शेषचरुहोमः -ॐ अभ्यादधामिसमिधमग्नेव्रतपतेत्वयि ।। व्रतञ्च-
श्रद्धाञ्चोपै मीन्धेत्वादीक्षितोऽअहम् ।।२।। ॐ यत्रब्रह्मचक्षत्रञ्चसम्य-
ञ्चौचरतः सह ।। तँल्लोकम्पुण्यम्प्रज्ञेषं यत्रदेवासहाग्निना ।।३।।
ॐ यत्रेन्द्रश्चवायुश्चसम्यञ्चौचरतः सह ।। तँल्लोकम्पुण्यंप्रज्ञेषंयत्र-
सेदिर्न्नविद्यते स्वाहा ।।४।।

यस मन्त्रले शेष चरु हवन गरिदिनू ।

यजमानोऽग्नेः पश्चिमभागे प्राङ्मुखउपविश्य उदङ्मुखेभ्यः
आचार्यऋत्विगादिभ्यो दक्षिणां दद्यात् ।

यजमानले अग्निको पश्चिमतिर बसी पूर्व फर्केर आफूतिर फर्केका आचार्य ऋत्विक् आदिलाई दक्षिणा दिनू ।

गोदानम्-ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
ॐ इरावतीधेनुमतीहिभूतꣳ सूयवसिनीमनवेदशस्या ॥
व्यस्कब्भ्नारोद सीविष्णवेतेदाधर्त्थपृथिवीमभितोमयूखैः स्वाहा ॥

यी दुवै मन्त्रले गाईको पूजा गर्नू । प्रत्यक्ष गाई नभए निष्क्रय द्रव्यको पूजा गर्नू ।

ब्राह्मणं च त्रिः सम्पूज्य- ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥

यस मन्त्रले ब्राह्मणको पूजा गर्नू ।

गां त्रिः सम्पूज्य कुशजलेन गामभ्युक्ष्य गोपुच्छं गृहीत्वा स्वशिरस्य-

भिषिञ्चेत्-ॐ मनोमेतर्पयतव्वाचम्मे तर्पयतप्प्राणम्मे तर्पयतचक्षुर्म्मेतर्पयत-श्चोत्रम्मे तर्पयतात्मानम्मेतर्पयतप्रजाम्मेतर्पयतपशून्मेतर्पयत गणान्मेत-र्पयत गणामेमावितृषन् ।।

यस मन्त्रले गाईको पूजा गरेर पुच्छर समाती आफ्नू शिरमा जल छर्कनू ।

कुशादिसहितं गोपुच्छमादाय-ॐ तत्सद्विष्णुः ३ इत्यादि देशकालौ स्मृत्वा अमुकगोत्रोऽमुकशर्माऽहं मम अद्यकृतैतदस्मिन्कर्मणि तदङ्गत्वेन यथालब्धोपचारैः कृतपूजनहवनकर्मणः यथोक्तफलप्राप्तिपूर्वकम् अमुकदेवताप्रीतये इमां गां रुद्रदैवत्याम् इत्यादि योजयित्वा दद्यात् ।

अब संकल्प पढेर गाईको पुच्छर आचार्यको हातमा राखिदिनू ।

प्रार्थना -ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणी ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ।।

यस मन्त्रले गाईको प्रार्थना गरिदिनू ।

दानप्रतिष्ठार्थं द्रव्यं कुशादिकमादाय-ॐ अद्य कृतैतद् गोदान-प्रतिष्ठार्थमिदं द्रव्यम् इत्यादिः । ब्राह्मणः 'स्वस्ति' उच्चारयन् गृहीत्वा--ॐ कोदात्कस्माऽअदात्कामोदात्कामायादात् । कामोदाताकामः प्रतिग्रहीताकामैतत्ते ॥

अब संकल्प गरेर दानप्रतिष्ठा दिनू र आचार्यले 'स्वस्ति' भनी 'कोदात्' मन्त्र पनि पढ्नू।

भूयसीदक्षिणादानम्-ॐ हिरण्यगर्भ-गर्भस्थं हेमबीजं विभावसोः॥
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

भूयसी दक्षिणा द्रव्यको पूजा यस मन्त्रले गर्नू ।

देयब्राह्मणान् त्रिः संपूज्य कुशादिसहितद्रव्यमादाय-ॐ तत्सद्विष्णुः ३ इत्यादिदेशकालाद्युच्चार्य अमुकगोत्रोऽमुकशर्माहं कृतस्यामुककर्मणो न्यूनातिरिक्तपरिपूर्णार्थं यथोक्तफलप्राप्त्यर्थं च इदं द्रव्यं सुवर्णं, रौप्यं,

ताम्रं वा अमुकदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथायोग्यभागं यथाकालेन विभज्य दातुमहमुत्सृजे।

दक्षिणा दिने ब्राह्मणको पूजा (टीका) गरी संकल्प गर्नू ।

सिद्धान्नदादम्- ॐ अद्येहाऽमुकगोत्रोऽमुकशर्माहं कृतस्याऽमुककर्मणो यथावत्फलप्राप्तये नानानामगोत्रान्नानानानामशर्मणो ब्राह्मणान्यथोपपन्नेनान्नेन भोजयिष्ये वा (आमान्नपक्षे) सन्तोषयिष्ये ॥

यो संकल्प ब्राह्मण-भोजनको निम्ति गर्नुपर्दछ ।

स्रुवेण ईशानस्थं भस्मं किञ्चिद् गृहीत्वा होता यजमानाय तिलकं कुर्यात्- ॐ त्र्यायुषञ्जमदग्नेः- ललाटे । ॐ कश्यपस्यत्र्यायुषम्- ग्रीवायाम् । ॐ यद्देवेषुत्र्यायुषम् - दक्षिणबाहुमूले । ॐ तन्नोऽअस्तुत्र्यायुषम्- हृदि ।

सुरोले ईशानतिरबाट थोरै भस्म झिकी होताले यजमानलाई मन्त्र पढ्दै लगाइदिनू ।

घृतछाया-पात्रं रौप्यं कांस्यं ताम्रं वा तत्र घृतं दूर्वां द्रव्यं निधाय छायां निरीक्षेत् ॐ तेजोसीति परमेष्ठीऋषिर्गायत्रीछन्द आज्यं देवता आज्यावेक्षणे विनियोगः ।। ॐ तेजोसिशुक्रममृतमायुष्याऽआयुर्म्मेपाहि।। देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्यामाददे ।। ॐ ध्रुवोसिध्रुवोयंयजमानोऽस्मिमन्नायतनेप्रजयापशुभिर्भूयात् ।। घृतेनद्यावापृथिवीपूर्य्येथामिन्द्रस्यच्छदिरसिविश्वजनस्यच्छाया ।।

घृतछायामा चाँदी, काँसो, तामाको पात्रमा घिउ, दुबो र द्रव्य राखेर छाया- 'तेजोसि०' मन्त्र पढेर हेर्नू ।

आज्यं स्पृष्ट्वा -ॐ अलक्ष्मीर्यच्च दौस्थ्यम्मे सर्वगात्रेष्ववस्थितम्।।
तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय ।।
आज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम् ।।

आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ॥
नभोन्तरिक्षं दिव्यं वा यन्मे किल्विषमागतम् ॥
सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगाच्छतु ॥

यस मन्त्रले घिउलाई छोइराख्नू ।

दूर्वां स्पृष्ट्वा -ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ॥
एवानोदूर्व्वेप्रतनुसहस्रेणशतेनच ॥
या क्षीरसागरोत्पन्ना दूर्वा पीयूषसम्भवा ॥
तत्संस्पर्शनमात्रेण ह्यायुर्वृद्धिर्यशो बलम् ॥

यस मन्त्रले दूबो र कुशले चलाउँदै पुनः छाया हेर्नू ।

कुशान्यादाय-ॐ अद्येहेत्यादि मम दुःस्वप्नदुर्निमित्तादिसर्वारिष्टोपश-
मनपूर्वकं तेजः-प्रज्ञा-शौर्य-यशो-बलायुर्लक्ष्मीपुष्टिवर्द्ध-

नार्थ मिदमाज्यं मृत्युञ्जयदैवतं (रौप्यं वा) कांस्यं पात्रं चन्द्रदैवतं ताम्रपात्रं वासूर्यदैव-तममुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

यो संकल्प पढेर ब्राह्मणलाई दिनू ।

दानप्रतिष्ठा-ॐ अद्य कृतैतत् सुवर्णघृतकांस्यपात्रदानकर्मणः प्रतिष्ठा-साङ्गता सिद्धये इदं रौप्यं चन्द्रदेवताकं यथा द्रव्यं यथानामदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । ॐ तत्सत् न मम।

यो संकल्प पढेर घृतछायाको दान प्रतिष्ठा दिनू ।

कर्ता स्वबन्धुवर्गैः सह यज्ञे पुष्पाक्षतान्याक्षिप्य प्रदक्षिणां कुर्यात्-

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ।।

कर्ताले आफ्ना बन्धुवर्ग सहित 'पानि-कानि' पढ्दै यज्ञको परिक्रमा गर्नू ।

ब्रह्माणं पुष्पाक्षतैः सम्पूज्य विसर्जयेत्-ॐ उत्तिष्ठब्रह्मणस्पतेदेवयन्त-स्त्वेमहे ॥ उपप्रयन्तुमरुतः सुदानवऽइन्द्रप्राशूर्भवासचा ॥

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

पुष्पाक्षतैः पीठदेवतां विसर्जयेत् । आचार्यादयो ब्राह्मणा ऐशान्यां स्थापितकलशजलेन यजमानस्य मङ्गलाभिषेकं कुर्युः ।

यी मन्त्रहरू पढ्दै ब्राह्मणले फूल-अक्षताले सबै देवताहरूको विसर्जन गरिदिनू । अनि सबै कलशको जल लिएर यजमानहरूलाई मङ्गल अभिषेक गरिदिनू । त्यसमा पहिले तान्त्रिक श्लोक र त्यसपछि वैदिक मन्त्रहरू पढिदिनुपर्दछ ।

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥१॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय च । आखण्डलोग्निर्भगवान् यमो वै निरृतिस्तथा ॥२॥

वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा॥३॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धा क्रिया मतिः । बुद्धिर्लज्जावपुःशान्तिस्तुष्टिःकांतिश्च मातरः॥४॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः । आदित्यश्चन्द्रमा भौमो बुधो जीवसितार्कजाः॥५॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । देव-दानव-गन्धर्वयक्ष-राक्षस पन्नगाः ॥६॥
ऋषयो मनवो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसो गणाः ॥७॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये ॥८॥
सरितः सागराः शैलास्तीर्थानि जलदाः नदाः । एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥९॥

ॐ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ अश्विनो-भेषज्येनतेजसेब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येनव्वीर्यायान्नाद्या याभिषिञ्चामीन्द्रस्येन्द्रियेणब्बलायश्रियैयशसेभिषिञ्चामि ॥१॥ कोसिकतमोसिकस्मैत्वाकायत्वा ॥ सुश्लोकसुमङ्गलसत्यराजन् ॥२॥

शिरोमेश्रीर्यशोमुखन्त्विषिः केशश्चश्मश्रूणि ।। राजामेप्राणोऽअमृतꣳ
सम्राट्चक्षुर्विराट्श्रोत्रम् ।।३।। जिह्वामेभद्रंवाङ्महोमन्युः स्वराड्भामः।।
मोदाः प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसदः ।।४।। बाहूमेबलमिन्द्रियꣳ
हस्तौमेकर्मवीर्यम् ।। आत्माक्षत्रमुरोमम ।।५।। पृष्टीर्मेराष्ट्रमुदरमꣳ
सौग्रीवाश्चश्रोणी ।। ऊरूऽअरत्नीजानुनीव्विशोमेङ्गानि सर्वतः ।।
नाभिर्म्मेचित्तंविज्ञानम्पायुर्म्मेपचितिर्भसत् ।। आनन्दनन्दावाण्डौमेभगः
सौभाग्यम्पसः ।। जङ्घाभ्याम्पद्भ्यान्धर्मोस्मिविशिराजा प्रतिष्ठितः
।।७।। प्रतिक्षत्रेप्रतिष्ठामिराष्ट्रेप्रत्यश्वेषुप्रतितिष्ठामिगोषु ।। प्रत्यङ्गे-
षुप्रतितिष्ठाम्यात्मन्प्रतिप्राणेषुप्रतितिष्ठामिपुष्टे प्रतिद्यावापृथिव्योः प्रति-
तिष्ठामियज्ञे ।।८।। त्रयादेवाऽएकादशत्रयस्त्रिꣳशाःसुराधसः बृहस्पति-
पुरोहितादेवस्यसवितुः सवे ।। देवादेवैरवन्तुमा ।।९।। प्रथमाद्वितीयैर्द्विती-

यास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेनयज्ञोयजुर्भिर्यजूꣳषिसामभिः
सामान्यृग्भिर्ऋचः पुरोनुवाक्याभिः पुरोनुवाक्यायाज्याभिर्याज्यावषट्कारै-
र्वषट्काराऽआहुतिभिराहुतयोमेकामान्समर्द्धयन्तु भूः स्वाहा ॥१०॥
ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः
शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः
शान्तिरेवशान्तिः सामाशान्तिरेधि ॥११॥ ॐ तच्चक्षुर्देवहितम्पुर-
स्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः शतञ्जीवेमशरदः शतꣳ श्रृणुयामशरदः
शतम्प्रब्रवाम शरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात्
॥१२॥ ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः
स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥१३॥ ॐ
विश्वानि देवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥१४॥

ॐ यथेमां वाचङ्कल्याणीमावदानिजनेभ्यः ब्रह्मराजन्याभ्याᳬ शूद्रायचार्याय चस्वायचारणायच ।। प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मे कामः समृद्धयतामुपमादोनमतु ।।१५।। ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथो जायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनः पर्ज्जन्योवर्षतुफलवत्योनऽओषधयः पच्यन्तांयोगक्षेमोनः कल्पताम् ।। ॐ पुनस्त्वादित्यारुद्रावसवः समिन्धताम्पुनर्ब्रह्माणोवसुनीथयज्ञैः ।। घृतेनत्वन्तन्वंवर्द्धयस्वसत्याः सन्तुयजमानस्यकामाः ।। दीर्घायुस्तऽओषधेखनितायस्मैचत्वा खनाम्यहम् ।। अथोत्वन्दीर्घायुर्भूत्वाशतवल्शाविरोहतात् ।। नतद्रक्षाᳬसिनपिशाचास्तरन्तिदेवानामोजःप्रथमजᳬ ह्येतत् ।। योबिभर्तिदाक्षायणᳬ हिरण्यᳬ

सवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणुतेदीर्घमायुः ।। ॐ मनसः काममाकूतिंवाचः सत्यमशीय ।। पशुनाꣳ रूपमन्नस्यरसोयशः श्रीः श्रयताम् ।।१६।।

रक्षाबन्धनम्-ॐ त्वंयविष्ठदाशुषोनॄँः पाहिश्रृणुधीगिरः ।। रक्षातोकमुतत्क्मना ।। ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः।।

तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ।।

यस मन्त्रले रक्षासूत्र यजमानलाई बाँधिदिनू ।

तिलकम्-ॐ त्र्यायुषञ्जमदग्नेः- ललाटे । कश्यपस्य त्र्यायुषम्-ग्रीवायाम् ।।

यद्देवेषु त्र्यायुषम्-दक्षिणबाहुमूले । तन्नोऽअस्तु त्र्यायुषम्-हृदि।

माथिका मन्त्र पढ्दै यजमानलाई तिलक लगाइदिनू ।

यजमान इदं मण्डलाद्युपकरणमाचार्याय प्रतिपादयामीति जलेनोत्सर्गं कुर्यात् ।

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः।।
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।। ॐ अच्युताय नमः ३ ।

यजमानले यज्ञको उपकरण (खलो-फुलो) आचार्यलाई दिएँ- भनी संकल्प गरिदिनू ।

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिः स्वभावात्।।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ।।१।।

यो मन्त्र पढेर कर्मपात्रको जल-कुश भूमिमा छाडिदिनू ।

अञ्जलिं बद्ध्वा ब्राह्मणान् प्रार्थयेत् - ममाऽमुककर्मणि यन्यूनातिरिक्तं तद् भवद्वचनात्सर्वं परिपूर्णमस्तु । ॐ अस्तु परिपूर्णम् —ब्राह्मणा ब्रुयुः।

अब ब्राह्मणलाई मेरो अमुक कर्म पूर्ण भयो ? भनेर सोध्नू र ब्राह्मणले 'पूर्ण भयो' भनिदिनू ।

ब्राह्मणपादान् प्रक्षाल्य पादोदकं गृहीत्वा तान्भोजयित्वाऽऽशिषो गृहीत्वा सुहृद्बन्धुवर्गादिभिः सह सोत्साहो भुञ्जीत ।। इति ।।

अब यजमानले ब्राह्मणको पाउ धुनू र भोजन गराउनू, अनि उनको आशीर्वाद लिएर आफ्ना बन्धुवर्ग सहित उत्साहपूर्वक भोजन गर्नू ।

—o—

शण्डामर्कहोमविधिः- तण्डुलकणमिश्रान्सर्षपान् गृहीत्वा । प्रथमाहुतौ- शण्डामर्का इति प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता सतिकाद्वाराग्नौ तण्डुलकणमिश्रसर्षपहोमे विनियोगः । ॐ शण्डामर्कऽउपवीरशौण्डकेय उलूखलः ॥ मलिम्लुचोद्रोणासश्च्यवनोनश्यतादितः स्वाहा इदं शण्डामर्काभ्यामुपवीराय सौण्डिकेयाय मलिम्लुचाय द्रोणासायभ्यश्च्यवनाय नमः ॥ द्वितीयाहुतौ- आलिखन्निति प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता सूतिकाद्वाराग्नौ तण्डुलकणमिश्रसर्षपहोमे विनियोगः ॥ ॐ आलिखन्ननिमिषः किंवदन्त उपश्रुतिः हर्यक्षः कुम्भीशत्रुः पात्रपाणि-र्नृमणिहन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादिः स्वाहा ॥ इदमालिखतेऽनिमिषाय किंवदद्भयः उपश्रुतये हर्यक्षाय कुम्भशत्रवे पात्रपाणये नृमणये हन्त्रीमुखाय सर्षपारुणायच्यवनाय नमः ॥इति॥

शण्डामर्क होममा- कनिका (ढुटो) र सरस्यूँ लिई प्रथम आहुति विनियोग सहित मन्त्र पढेर दिनू अनि दोस्रो आहुतिमा पनि विनियोग र मन्त्र पढेर दिनुपर्दछ ।